प्रपञ्चसारहस्यम्



श्या ॐ श्रीगणेशाय नमः ॐ नमः परदेवतायै ॐ देवीं दा
र० नवदैत्यदर्पनिवहोन्मूलयन्तीं शिवां ब्रह्मानन्दम-
१ हेशमौलिमणिभिः संसेविताङ्घ्रिद्वयाम् नत्वा श्रीगु
रुपादपद्मप्रणामोद्यामृतस्राविनः पूर्णानन्दगिरि-
स्तनोति विरलां श्यामारहस्याभिधाम् ॐ स्वतंत्रं वी
रतंत्रं च तंत्रं फेत्कारिणी तथा कालिकाकुलसर्व
स्वं कालीतंत्रं च यामलम् कुलचूडामणिं चैव कु-
मारीतंत्रमेव च कुलार्णवं तथा कालीकल्पभैरव
तंत्रकम् कालिकाकुलसद्भावं तथा चोत्तरतंत्रकं
गुरूणां च मतं ज्ञात्वा साधकानां तथा मतम् शुद्ध
बुद्धिस्वभावार्थं वक्ष्यामि मोक्षकारिणीम् तदुक्तं स्व-
तंत्रे क्रोधीशं बिन्दुयुक्तं ते त्रिमूर्त्यग्निसमायुतम्
त्रिलिखेत्परतो देवि कूर्चद्वयमेव च मायाद्वयं स
मालिख्य श्रुतिसंवर्तसंलग्नं दक्षकालिके समव
र्णान् पूर्ववत्परमेश्वरि स्वाहान्तेयं महाविद्या द्वावि
शत्यक्षरा परा अनया सदृशी विद्या नास्ति ज्ञाने तु मा
मके कुमारीतंत्रेऽपि श्रीभैरव उवाच श्रुतिगुह्यत
रे सिद्धज्ञानात्मकं सनातनम् श्रीदेव्युवाच महागोप्यं च
कथितं नैव शक्यते श्रीदेव्युवाच प्रियासीति कथया
मि तव प्रिये रूपाणि बहुसंख्यानि प्रकृतेः सन्ति भावि

ति तेषां मध्ये महेशानि कालीरूपं मनोहरम् विशे
षतः कलियुगे नराणां भुक्तिमुक्तिदम् तस्मात्तूपास·
काश्चैव ब्रह्मविष्णुशिवादयः चन्द्रः सूर्य्यश्च वरुणः
कुवेरोऽग्निस्तथापरः दुर्व्वासाश्च वशिष्ठश्च दत्तात्रेयो बृ
हस्पतिः बहुनाकिमिहोक्तेन सर्व्वे देवा उपासकाः
कालिकायाः प्रसादेन भुक्तिमुक्तिः करे स्थिता तस्या
मन्त्रप्रवक्ष्यामि यतो राज्ये युगत्रयम् ककारं वह्निसं
युक्तं रतिविन्दुसमन्वितम् त्रिगुणं च ततः कूर्च्चयु
ग्मं लज्जायुग्मं तथा दक्षिणे कालिके चेति पूर्व्ववीजा
नि वेष्टयेत् वह्निजायावधिः प्रोक्तः कालिकायाम
नुर्म्मतः नस्य सिद्धाद्यपेक्षास्ति नारीमित्रादिदूषणम्
स्फूर्तिरपि ग्रन्थेऽनेन ब्रह्मरन्ध्रं ब्रह्मस्वरूपिणिमामा·
ति स्वभगां त्रिगुणं शक्रा कामरेफेन्दिरा विन्दुमेलन
रूपा पतत्रिगुणितामादौ तदनु कूर्च्चद्वयं कूर्म्मवीज
व व्योमषष्ठस्वरविन्दुमेलनरूपम् तदेवह्निरुद्धार्य
भुवनां द्वयम् भुवनात् व्योमज्वलनेन्दिरा स्वमेल
नरूपा तदन्तम् दक्षिणे कालिके तवाभिमुखेता त
दनुवीजसप्तकमुद्धार्य्य दृढङ्गानुजायामुच्चरेत् म·
त्वा शिवमयो भवेत् सर्व्वसिद्धीश्वरो भवेत् गतिस्त·
स्यास्तिना मस्यसत्वनारीश्वरः सत्वदेवेश्वरः सत्वस

गुणा देवेश्वर इति श्रीभैरव उवाच नात्र चिन्ता विशुद्धिर्वा ना
२· रिमित्रादिदूषणम् न वा प्रयासबाहुल्यं समयासम-
२ यादिकम् दैवैर्दैवत्वविषयैस्सिद्धैः खेचरसिद्धये यत्न
गैरादृतं सर्वैर्मुनिभिश्च मुमुक्षुभिः कामिभिर्दुःखि
स्वार्थलिप्सुभिः सेविता परा न चित्तक्षयबाहुल्यं का
यक्लेशाकरं न च यत्र यं चिंतये मंत्री सर्वसिद्धिसमृद्धि
दो तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः गद्यपद्य
मयी वाणी सभायां तस्य जायते तस्य दर्शनमात्रेण
वादिनो निष्प्रभां गताः राजानोऽपि च दासत्वं भजंते
किं परे जनाः वह्नेः शैत्यं जलस्तंभं गतिस्तंभं विवस्वतः
दिवारात्रिद्वयं चैव वशीकर्तुं क्षमो भवेत् सर्वस्यैव
जनस्यैव वल्लभः कीर्तिवर्द्धनः श्रुतेव भजते देवा गा
णत्वं दुर्लभं नरैः चन्द्रसूर्यसमो भूत्वा वसेत्कल्पायु
तं दिवि न तस्य दुर्लभं किंचिद्यः स्मरेद्घोरदक्षिणम्
अथास्याः सपर्याविधिर्लिख्यते ब्राह्ममुहूर्ते उत्थाय
बद्धपद्मासनः शिरःस्थायां शुक्लवर्णसहस्रद-
लकमलकर्णिकायां शशाहीनशारदिन्दुमन्दरखं-
न्दमण्डलान्तर्गतहंसपीठे निजगुरुं ध्यायेत् यथा शु
द्धस्फटिकसंकाशं शुद्धक्षौमविराजितम् गंधानुले-
पनं शांतं वराभयकरांबुजम् मन्दस्मितं निजगुरुं।

कारुण्येनावलोकनं वामोरुशक्तिसंयुक्तं शुक्लाभ
रणभूषितम् स्वशक्त्यादक्षहस्तेनधृतवारुकलेवरं
वामेधृतोत्पलायाश्चस्वरक्तायाः सुशोभनं परानन्द
रसोल्लासलोचनद्वयपंकजं इतिध्यात्वादिव्याभिषे
केनगुरुणासंप्रदायागतकृतनामपूर्वकंमानसै
रुपचारैराराध्यऐंह्रींश्रींहसखफ्रेंहसक्षमलवरयूं
हसफेंश्रीअमुकानन्दनाथायश्रीअमुकादेवंवाश्री
गुरुपादुकांपूजयामि इतिगुरुपादुकांमत्वाजप
समर्पणंकृत्वाप्रणमेद्यथा अज्ञानतिमिरान्धस्यज्ञा
नांजनशलाकया चक्षुरुन्मीलितंयेनतस्मैश्रीगुर
वेनमः। अथसारदाटीकाकारश्रीराघवभट्टमते
तुशक्तिविषयेशुक्लमेवेतिनिश्चितंवचनद्वयदर्श
नात् तद्यथा श्वेतांबरधरंगौरंश्वेताभरणभूषितम्
अपिच रक्तमाल्याम्बरधरंस्वरक्तंपद्मविस्तरम् इतिव
समीचीनम् श्वेतवर्णगुरोर्ध्यानांतरंभवतिशक्तिवि
षयेतुतथादर्शनात् यथाज्ञानार्णवे ब्रह्मरन्ध्रेसर
सारेकर्पूरधवलोगुरुः तस्मात्संप्रदायानुगमात्गु-
रोर्ध्यानंकुर्यादितिशेषः अथगुरोराज्ञांगृहीत्वा मू
लाधारपद्मकर्णिकास्थत्रिकोणांतर्गतस्वयंभूलिं
गवेष्टिनीप्रसुप्तभुजगनिभाकारांसार्द्धत्रिवलयाविद्युत्सु

पप जप्रभां नीवारशूकतन्वी कुलकुण्डलिनी इष्टदेवता।
२ स्वरूपं कुकारेणेदं इति मन्त्रेनावधेव न दह्नेयोगात्
३ सचैतन्यां विधाय ब्रह्मवर्त्मना परमशिवे नीत्वा तयोः
3 सामावेश्यं विष्टां च चन्द्रमण्डले कुलगुरुं ध्यायेत्
तदुक्तं कालिकास्मृतौ मूलाधारे स्मरेद्दिव्यं त्रिकोणं
तेजसां निधिम् तस्याग्निशिखामानीयस्वयःडुहेमव
स्थिताम् नीलतोयदमध्यस्थतडिल्लेखेवभास्वराम्
नीवारशूकतन्वीं च सुपीताभास्करोपमाम् तस्याः।
शिखाया मध्ये च परमात्मा व्यवस्थिताम् स ब्रह्मा स ह
रिः स शान्तः स शिवः परमः स्वराट् स एव विष्णुः स प्राणः स
कालाग्निः स चन्द्रमाः इति कुलकुण्डलिनीं ध्यात्वा
सर्वपापैः प्रमुच्यते स महापातकेभ्यः प्रमुक्तो भवति
सर्वसिद्धिं कृत्वा भैरवो भवतीति। अथ कुलगुरुत्व·
था कुलचूडामणौ मूलादिब्रह्मरन्ध्रान्तं गुणं ध्यात्वा
गुरुं स्मरेत् प्रह्लादानन्दनाथाख्यं सकलानन्दमेव
च कुमारानन्दनाथाख्यं वशिष्ठानन्दनाथकम् क्रोधा
नन्दमहानन्दौ ध्यानानन्दं ततः परम् बोधानन्दं तत
श्चैव ध्यायेत्कुलगुरूपरि महारसरसोल्लासहृद
या घूर्णलोचनाः कुलालिङ्गनसम्भिन्ना घूर्णिताशेष
मानसाः कुलशिष्टैः परिवृताः सर्वकुलतन्त्रार्थवादिनः

पंवंकुलगुरुन्नत्वाविसृज्यकुलमातृकाम् कुलस्थाने
समानीयस्नानार्थंतीर्थमाश्रयेत् शाक्तंकुलगुरुंव
न्यस्यस्मृतंकुलसद्भाववहम् रहस्यमद्भुतंप्रोक्तंगोसब
पशुशंकटे कुलनाथंपरिमज्जयेच्छाक्ताःपरसेविताः
तेषांशिक्षावयागस्यअभिचारायकल्पते तस्मात्स
र्वप्रयत्नेनकुलीनंगुरुमाश्रयेत् कुलीनःसर्वविद्या
नामधिकारीतिगीयते दीक्षागुरुःसएवात्मासर्वमं
त्रस्यनापरः अस्मच्छ्रुतौ प्रकाशमानांप्रथमेप्रया
णेप्रतिप्रयाणेऽप्यमृतायमानाम् अन्तःपदव्यामनु
संचरंतीमानन्दरूपामबलांप्रपद्ये इति अहंदेवीन
चान्योऽस्मिब्रह्मैवाहंनशोकभाक् सच्चिदानन्दरूपो
ऽहमात्मानमितिभावयेत् प्रातःकृत्यमवश्यमेवनि
त्यंकरणीयम् प्रातःकृत्यमकृत्वातुयोदेवींभक्तितो
ऽर्चयेत् तस्यपूजाचविफलाशोचहीनायथाक्रिया
अथनद्यादौगत्वाकालिकारूपंस्वंविभाव्यरक्तवर्णं
रजतात्मकंकुलगर्भमनामातर्जनीभ्यांधृत्वाऽऽचम्य
मूलंस्मरन् मलापकर्षकंकृत्वा आचम्य ॐअद्येत्या
दिकुलदेवताप्रीतिकामोमंत्रस्नानमहंकरिष्ये इतिसं
कल्प्यजलेत्रिकोणचक्रंकृत्वासूर्य्यमंडलात्कुशाग्र
द्वयातीर्थमावाह्यमूलांते ॐआत्मतत्त्वायस्वाहा वि

श्या यातत्त्वायस्वाहा शिवतत्त्वायस्वाहा इतिआचामेत् अ
२ थवाॐह्रींस्वाहा इमेनेनत्रिराचम्यात्मानंत्रिःसंप्रोक्ष्य
४ मूलेनमृत्तिकयाअंगलेपनंकृत्वामूलंपठन्कुंभमुद्र
यास्वमूर्द्धिनत्रिर्जलमभिषिच्यांगुलीभिःश्रवणादी
निसंरुध्यद्वाराणिसंवृत्यत्रिर्निमज्जेत तदुक्तंकुमारी
तंत्रे वेदाद्यंचतथामायास्वाहेत्याचामनंमतम् नील
तंत्रेऽपि मृत्कुशामपिसंगृह्यगत्वाजलांतिकंततः
मलापकर्षकंकृत्वामंत्रस्नानंसमाचरेत् विधयात्रि
निमज्जेवआचामेत्पयसापुनः कुलचूडामणौ कुल
रत्नहरिद्रालाविविधामममूलेनयः तत्रयःकुलशिष्य
स्समंतदुपपराम्रशन् दिवंसर्वीमर्थ्यैर्वीवपाताल
भूतसंभवाम् आचांतःकुलदर्भेणसदर्भःकुलपुत्र
कः कुलपात्रेसहृद्वीवसतिलंसजलंततः गृहीत्वाकु
लदेवस्यप्रीतयेस्नानमाचरेत् कृतसंकल्पपर्वादौकु
लवक्तं जलेन्यसेत् जलस्थानात्समानीयकुलमुद्रा
कुशेनव कुलतीर्थानितत्रैवसमावाह्यशिवात्मकम्
ततोघवविद्यापीत्वाविद्यावप्रोत्तुरणमतोः अथांकु
शमुद्रा यथाज्ञानार्णवे दत्तमुष्टिंविधायाथतर्जनी
मंकुशरूपिणी अंकुशाख्यामहामुद्रात्रैलोक्याकर्ष
णक्षमा तीर्थावाहनमंत्रो यथाश्रीक्रमसंहितायाम्

गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिन्धु का
वेरि जलेऽस्मिन् सन्निधिं कुरु अथ स्वतंत्रेऽपि मूलं पठ
न् हृणितोयं मुद्रयांकुशसंज्ञया तीर्थावाहयेद्देवि
आवाहमेत्साधकाग्रणीः आत्मविद्याशिवैस्तत्त्वैस्ततो
यागगृहं विशेत् कुंभमुद्रया यथा गृहाणि वै दक्षांगुष्ठ
पांगुष्ठे त्रिसाहस्तहृदयेन तु सावकाशं चैव मुष्टिं कु
र्म्मुद्रां विदुर्बुधाः समच्छिद्राणि संरुध्य ततो मंत्रवि
द्यामसुधीः आत्मविद्याशिवस्तत्त्वैरेवामेत्साधकाग्र
णीः वह्निजायां ततो दत्वा शुठेन ययमाप्रिये ॐ मा
नधनि वज्रिणि महाप्रतिशरे रक्ष रक्ष हुं फट् स्वाहा
इति शिखाबंधनम् मूलेन तिलकं कृत्वा पूर्ववदाचा
म्य वैदिकीं संध्यां विधाय तांत्रिकीं संध्यां कुर्य्यात्
तदुक्तं कुमारीकल्पे प्रणवं पूर्वमुद्धृत्य समानां ते च धा
नीति च वज्रिणीति पदं प्रोक्तं महाप्रतिशरे तथा रक्ष
द्वयं हुं फट् स्वाहा इति च तदनंतरम् अनेनैव च मंत्रेण
रक्षां कुर्य्याद्विचक्षणः रक्षामिति शिखाबन्धनरूपे
ण वक्ष्यं चलेंग्रंथिबंधनरूपेण वा कुर्य्यादित्यर्थः सा
रदाटीकायां च उक्तेनैव विधानेन कृत्वा स्नानं च तां
त्रिकम् वैदिकीं तांत्रिकीं संध्यां कृत्वा तर्पणमाचरेत्
तांत्रिकी संध्या यथा तदुक्तं तत्रैव पुनराचम्य विन्य

प्रा
२
५

एषडंगामपिमंत्रवित् वामहस्तेजलंगृह्यगलितोदक
विन्दुभिः सप्तधाप्रोक्षणंकृत्वामूर्द्धिमंत्रेणगुत्वस्य
अवशिष्टोदकंदक्षहस्तेसंगृह्यतुद्धिमान् इडयाकृष्य
देहांतःक्षालितपापसंचय कृष्णवर्णंतदुदकंदक्ष‍ना
नासाविरेचयेत् दक्षहस्तेचतन्मंत्रीपापरूपंविचि
न्त्य पुरतोवज्रपाषाणेप्रक्षिपेदस्त्रमंत्रतः अमत्रापि
षडंगमाससमाचर्यवामहस्तेजलंततः गृहीत्वादक्षि
णेचैवंसम्पुटंकारयेत्ततः शिववायुजलपृथ्वीवह्नि
वीजैस्त्रिधापुनः अभिमंत्र्यचमूलेनसप्तधातत्त्वमुद्र
या निक्षिपेत्जलंमूर्द्धिशेषंदक्षेविधायच शरी
रांतःस्थितपापंक्षालयेत्स्नायकाग्रणीः । अथप्रयोगः
पूर्ववदाचम्यषडंगन्यासंकृत्वा वामहस्तेजलंनिधा
य दक्षहस्तेनाच्छाद्यहंयंवंलंरंइतित्रिरभिमंत्र्यमूल
मुद्रारंध्रगलितोदकविन्दुभिः तत्त्वमुद्रयामूर्द्धि
सप्तधाभ्युक्षणंकृत्वाशेषजलंदक्षहस्तेसमादायते
जोरूपंध्यात्वाइडयाकृष्यदेहांतःपापंप्रक्षाल्यकृष्ण
वर्णंतज्जलंपापरूपंध्यात्वापिंगलयाविरेच्यअग्रतःक
ल्पितवज्रशिलायांफडितिप्रक्षिपेत् इतितांत्रिकी
संध्या ततःहस्तौप्रक्षाल्याचम्यजलेयंत्रंध्यात्वासाव
रणंदेवतामावाह्यपेशानेपंश्रीअमुकानन्दनाथभै

रुवस्तृप्यतामिति देवतीर्थेन त्रिः सकृद्वा शुद्धोदकेन
संतर्प्य वह्नौ परमगुरुं नैऋत्यां परापरगुरुं वायव्यां प·
रमेष्ठिगुरुं पूर्ववत् संतर्प्य मध्ये श्रीश्रमुकदेवतारू
प्यतामिति यथाशक्तितः संतर्प्य एकेकाञ्जलिनापि
वारान्संतर्पयेत् अथाक्रमेण मूलमुच्चरन् साङ्गसपरि
वारसवाहन· महाकालसहित· श्रीदक्षिणकालिका
मातारूप्यतामिति त्रिः सप्तधा वा ऋषीन्भैरवांतानेव·
कल्पोक्तविधिना स्वपित्रादीनपि संतर्प्यउर्द्धात्तर·
क्षपुष्पादिनार्घ्यं कृत्वा ह्रीं हंसः मार्तंडभैरवाय प्रका
शशक्तिसहिताय इदमर्घ्यं स्वाहा इति सूर्याय वि·
द्य सूर्यस्थाय दत्वा सूर्यमण्डले देवीं ध्यात्वा उद्धृतवि
ल्वपत्रजवापुष्पादिनार्घ्यं कृत्वा देवीगायत्रीमुच्चरन्
महाकालसहितायै श्रीदक्षिणकालिकायै इदमर्घ्यं
स्वाहा इत्यर्घ्यं दत्वा गायत्रीं यथाशक्तितः प्रजप्य देव्यै
समर्पयेत् तत्क्रमम् तर्पणादौ प्रयुञ्जीत तृप्यतां म·
हाकालभैरवः पिता मूलान्ते तर्पयामीति स्वाहान्तेन त
र्पणं मतम् एवंविधं तर्पणं तु कृत्वा पापक्षयो भवेत्
कुलवृक्षमणेश्च भैरवाय च देवाय भैरवेणाव कर्त्तृण
भैरवाख्यप्रदानं तु संमतं सुखाख्यपूर्ववतः दातव्यान गृही
तेऽस्वतन्तोत्तिगात्रुरूपतः भैरवीभैरवान्मानमावयेय

श्या दशोषतः श्राद्धविवाहेदानेचस्नानेनागप्रपूजने
२ एवंचिन्तापरोदेवःप्रसीदतिनसंशयः अस्मद्वा एव-
८ मेवविधानेनयथाशक्तिचतर्पयेत् मार्जनंभैरवा
यतित्रिरर्घ्यंकल्पयेत्ततः कुलवृक्षमणीश्च कुलम-
र्घ्यंयदेवायत्रिरर्घ्यंचप्रकल्पयेच्च देवीपितॄनृषींश्च
तर्पयेत्कुलवारिणा नन्दिकेश्वरसंहितायांच
यावन्नदीयतेचार्घ्यंभास्करायनिवेदनम् तावन्नपू
जयेद्विष्णुंशंकरंवासुरेश्वरीम् दिनेशायचचोत्तिष्ठ
न्वारिणाअंजलित्रयम् अष्टोत्तरशतान्यत्रगायत्रीं
प्रजपेन्मंत्रधीः कालिकायैपदंप्रोक्तंविद्महेतत्पदंन
रम् श्मशानवासिनीङेन्ताधीमहीतिततोवदेत्
तन्नोघोरेपदंप्रोक्तंप्रचोदयात्समस्तिति अस्याःप्रभाव
मात्रेणमहापातककोटयः सद्यःप्रलयमायांतिसा
धकस्यचनान्यथा रावणस्यवधाश्चैवरामचन्द्रोवि-
मोचितः गुरुदाराकर्षणाच्चदेवचन्द्रोविमोचितः
मातृवधात्परशुरामोमोचितोऽस्याःप्रसादतः सुरा
पानाद्ब्रह्मश्रीकृष्णोदत्तात्रेयस्तथैवच एवमेषांमहा-
दिव्यानामन्यांचैवस्मरेत् महापातकयुक्तोऽपि
प्रजपेद्दशधायदि सर्वसंसर्गमहादेविमुक्तोभवति-
तत्क्षणात् अथकुलवृक्षमणीश्च उक्तायकुलवृक्षे

हेपरिधायकुलेनत्त तिलकंकुलरूपंचकृत्वावप
कुलेश्वरः स्वतंत्रेऽपि मोक्षार्थीरक्तवस्त्रेणभोगा
र्थीश्वेतवाससा मारणेकृष्णवस्त्रंचवश्येपीतकंसदा
गृही उच्चाटेधूम्रवस्त्रंचकर्माणिकृत्वाकस्तंभकर्माणि
पीतधारयत ततोमंत्रीयागभूमिमथोविशेत तस्यांतत्रैव
ततश्चसाधकश्रेष्ठोहृदिमंत्रंपरामृशन् स्वबहिर्मी
नसौयोगीयागभूमिमथोविशेत् जलशौचंकरे
कृत्वागत्वाद्वारिमहेश्वरि क्षालयेद्धस्तपादौचवर्त
मानेनवर्त्मना यागस्थानानियथाफलकारिणाम्
एकलिंगेश्मशानेवाशून्यागारेचतुष्पथे तत्रस्थः
साधयेद्योगीविद्यांत्रिभुवनेश्वरीम् पंचक्रोशान्त
रेयत्रनलिंगान्तरमीक्ष्यते तदेकलिंगमाख्यातंतत्र
सिद्धिरनुत्तमा मुण्डमालातंत्रेच नदीतीरेविल्वमू
लेश्मशानेशून्यवेश्मनि एकलिंगेपर्वतेवादेवागा
रेचतुष्पथे शवस्योपरिमुण्डेचजलेवाकंठपूरिते
संग्रामभूमौयोनौवास्थलेवाविजनेवने यत्रकुत्रस्थ
लेरम्येयत्रवास्यात्मनोलयः अन्यत्रापि उक्तंपर्वते
वापिनिर्जलेवाचतुष्पथे देवागारेदेवकुम्भेविल्वमू
लेनदीतटे स्वगृहेनिर्जनारामेतथावाश्वत्थसन्निधौ
सर्वेषामेकतमंस्थानमाश्रित्ययत्नतः ॐवज्रोद

पूजा
२
७
7

कें ऊं फट् स्वाहा अनेन जलं सम्यगानीयासनम् उ
त्सीपवित्रं पविश्य ॐ ह्रीं विशुद्धं सर्वपापानि समया
शेषविकल्पमपनय हुं फट् स्वाहा इति पादौ प्रक्षा
ल्य पूर्ववदाचामेत् तदुक्तं कुमारीकल्पे ॐ वज्रोदके
हुं फट् स्वाहा मन्त्रेण मन्त्रवित् जलमानीय सम्यगा
सनं शोधयेत् ततः प्रणवं पूर्वमुद्धृत्य लज्जाबीजेन तथै
व च ततो विशुद्धं ते सर्वपापानि शमय द्वय अशेषा
नेविकल्पस्मात्समयेति ततः परम् कूर्च्चबीजमु
वेकं मंत्रं पादप्रक्षालने प्रिये अथ वामे त्रिकोणवृ
त्तभूबिंबं विलिख्याधारशक्तये नमः इति संपूज्य त
दुपरि अस्त्रमन्त्रेण शोधितं साधारपात्रं निधाय नमः
इति संपूज्य अंकुशमुद्रया सूर्यमण्डलात्तीर्थमावा
ह्य ॐ इति गाल्यधेनुं दर्शयेत् मुद्रां प्रदर्श्य ॐ इति द
शधा जप्त्वा तज्जलेन गृहद्वारमध्यस्थद्वारदेवताः प्र
पूजयेत् तदुक्तं तन्त्रान्तरे ततः आचमनं कृत्वा सामान्या
र्घ्यं प्रकल्पयेत् त्रिकोणवृत्तभूबिंबमण्डलं रच
यित्वाथ आधारशक्तिं संपूज्य तदाधारं विनिक्षिप
त् अस्त्रमन्त्रेण संशोध्य हृन्मन्त्रेण प्रपूरयेत् निक्षि
प्ते तीर्थमावाह्य गंगादीन्प्रणवेन तु दर्शयेद्धेनुमुद्रां
वै सामान्यार्घ्यमिदं स्मृतम् सामान्यार्घ्येण देवेशि पू

तयेद्वारपार्श्वयोः येत्रमुद्रायथा अमोमाभिमुखंवे
ष्टिताकनिष्ठानामिकाभ्तनः तथाचतर्जनीमध्या
येत्रमुद्रामतःपरा द्वारदेवतायथा गणेशंक्षेत्रपाल
चवटुकंयोगिनीतथा उर्द्धवामेचदक्षेचअर्थस्यैव
प्रकीर्तितम् अथपूजा द्वारेह्रंगांगणेशंवामेदां
क्षेत्रपालंदक्षिणेवांवटुकंअर्थः यांयोगिनीपूर्ववत
त्रैवगंगंगांयमुनांश्रीलक्ष्मींपंसरस्वतींचपूर्ववच
तद्वारेसंपुटवामांसंकोचेन पूजामण्डपान्तर्गत्वा
नेऋत्यांब्रह्मणेनमः वास्तुपुरुषायनमः इति गंध
पुष्पाभ्यांसंपूज्यात्ततसिद्धार्थतिलानन्नाराचमुद्र
या ॐसर्वविघ्नानुत्सारयहुंफट्स्वाहा ॐपवित्र
वज्रभूमेहुंहुंफट्स्वाहा अनेनभूमिमभिमंत्रयेत्
तदुक्तंस्वतंत्रे भूमिव्योमस्थितान्सर्वान्विघ्नांस्तां
स्तान्समाहतः सिद्धार्थास्तिलसंमिश्रैःप्रोत्सार्य्ये
न्मासनोविशेत् अस्मज्ञापि भूतापसर्पणंकुर्य्यात्स्व
तेणानेनसाधकः यस्मिन्कृतेस्थलेभूतादूरंयान्ति
स्वभावेन स्थितेषुसर्वभूतेषुनेवयंमण्डलायथा वि
लुंपन्तिसदालक्ष्यानवश्यन्तिदेवताः तस्माद्यत्नेनक
र्त्तव्यंभूतानामपसर्पणम् कुमारीतंत्रेऽपि प्रणवंपू
र्वमुद्धृत्यसर्वविघ्नांस्ततःपरम् उत्सारयततोहुंफट्स्वा

प्रपा हाचतदनंतरम् अनेनैव चर्ममंत्रेण विज्ञात्वास्तारयेत्
१ सुधीः प्रणवपूर्वंभुहूंभरस्वारस्ततदनंतरम् हूंफट्स्वा
८ हेतिमंत्रेण भूमिंच परिशोधयेत् ततः पवित्रवा
ग्वादौ प्रणवपूर्वंभुद्धरेत वर्मद्वयं ततश्चैव फट्स्वा
हातदनंतरम् अनेनैव विधानेन कुर्य्याद्रूपमिमं
त्रणम् अथासनानि यथा तत्क्रमम् मत्स्यसूक्ते म
उडुड़कमासीनश्यामेषु कोमलेषु वा विस्तारेषु स
माश्रितसमाथयत्नाद्धिहितमाम् अर्द्धाकषन्मासा
नोगर्भमृतमाकृमस्य उयाः चूडोपनयनेहीनम
तमस्चूडकविडः निवृत्तचूडकोवालोहीनोपनय
नः प्रमान् योमृतः पंचमवर्षतमेव कोमलेविडुः
स्वंतेत्रेऽपि कंवलेलोहितेवापि कृष्णेवा व्याघ्रचर्म
णि सन्यासी ब्रह्मचारी च विशेत् कृष्णस्य चर्मणि
मत्स्यसूक्तेपि कृष्णसारस्थी पचर्मस्य चूडंकंवलंत
था पीतवस्त्रं च शुक्लं वा आसनाय प्रकल्पयेत् मुंड
मालातंत्रे व्याघ्राजिनं सर्वसिद्ध्यै ज्ञानसिद्ध्यै मृगाजि
नम् वस्त्रासने रोगहरं वेत्रजं प्रीतिवर्द्धनम् कौषेयं
पुष्टिदं प्रोक्तं कंवलं सर्वसिद्धिदम् शुक्लं वा यदि वा र
क्तं विशेषाद्रक्तकंवलम् मृदुकोमलास्तीर्णं सग्रा
मेपतितंतद्द्यम् जंतुव्यापादितं वापि मार्गं वापि वरा

सनम् गर्भसुतं वा नारीणां अथवा योनिजांत्वचम्
सर्वसिद्धिप्रदं चैव सर्वभोगसमृद्धिदम् त्वचं वा यो॰
वनस्थानां कृष्णाहीरवरासनम् श्मशानकाष्ठघटि
तं पीठं वा यज्ञदारुजम् नदीच्छिन्नो विशेषात्तु कृष्ण
साराजिने शुभे उदासीनवनासीन स्नानकवल॰
वारिणः कुशाजिनावरेणाछ वस्त्रं ससमंततः प
करस्तं द्विहस्तं वा वस्त्रं गलभ्रष्टिन्नम् विशुद्धेश्वा
सने कृष्णात्सकारेण जनेद्बुधः इति अथ मृतासन
मवश्यमेवप्रत्यवायश्रवणात् कालीतंत्रे मृतास
नेविनादेवियोजयेत्कालिकां नरः तावत्कालं नार
कीस्याद्यावदाहूतसंप्लवम् यत्तुस्वतंत्रादौ केवला
द्यासनमुक्तं तत्तु स्वतंत्रासनम् किंतु मृतकप्राप्तमि
तिवाद्यम् स्मृताभावे विहितमिति तदुक्तम् मृता
भावे विष्टरं च शवरूपं प्रकल्पयेत् अथ भूमौ त्रि॰
कोणमण्डलं कृत्वा तत्र आधारशक्त्यादिभ्यो न॰
मः इति संपूज्य तदुपरि विहितासनमारोप्य कृतां
जलिः पठेत् तदुक्तम् मेरुपृष्ठऋषिः प्रोक्तः सुत॰
लं छंद ईरितम् कूर्मो देवता देवि आसनाय प्रकल्प
येत् विनियोगस्त्वकं वेतः पठेद्धृत्वा समंततः पृथ्वि
त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां

पुण २४

निर्मपवित्रंकृत्वासनम् इतिपठित्वातद्देवशिखांकुशा
स्तैरेवदापयेत मायाबीजमसुद्धार्थ्यआधारशा
क्तिमुद्धरेत कमलासनमालिख्यॐ नमो ऽनेनप्रपू
जयेत् कुमारीकल्पेपि आःकारांतसुरेखेचवज्ररे
खेततःपरम् हुंफट्स्वाहेतिकुर्य्यान्मण्डलंचश
वासने वीरासनेनोपविशेत्संपूज्यासनमेवच अथा
सनोपरिकुशत्रयंदत्त्वाह्रीं आधारशक्तयेकमलास
नायनमः इतिसंपूज्य आःसुरेखेवज्ररेखेहुंफट्
स्वाहा इतिमंत्रेणतत्रमण्डलिकांकृत्वातदुपरि
वीरासनेउपविश्यविजयांस्त्रीकुर्य्यात् तदुक्तंभावचू
डामणौ विनाहेतुकमासाद्यहोभयुक्तोमहेश्वरः न
पूजांममकुर्य्यात्तुनध्यानेनचचिंतनम् तस्मात्तुका
वपीत्वाचपूजयेत्परमेश्वरी विजयाकल्पेपि संविदा
सवयोर्मध्येसंविदेवगरीयसी संविद्योगस्तेनेह
पूजादौसाधकोत्तमैः कर्त्तव्याचमहापूजाकरणीया
सनिन्दितैः अमत्रापि आनन्देनविनाभ्रंशोनतुष्यं
तिदेवताः तस्मात्पूजादौविजयास्त्रीकारःकार्य्यः सा
ऽनश्चतद्धी ब्राह्मणीक्षत्रियावैश्याशूद्राच श्वेतरक्त
कृष्णपीतप्रसूनभेदाः तासांशुद्धिर्विजयाकल्पानुसा
रेणालिख्यते संविदेवासमंसंभूतेब्रह्मपुत्रिमदानचे

मेरवाणांवदन्तार्थंपविद्याभवसर्वदा ॐब्रह्माण्यैनमः
स्वाहासाधयेद्पराततः इत्यनेनाभिमंत्रणम् सिद्धि
मूलिप्रियेदेविहीनबोधप्रबोधिनि राजप्रजावशं
कारिशत्रुकंठत्रिशूलिनि ऐंदात्रियायैनमःस्वाहा
शोधयेद्पराततः अज्ञानेध्यनदीमाग्रेमालाग्रेज्ञान
रूपिणि ज्ञानलक्ष्मीकृतिप्रीतिंसम्यग्ज्ञानंप्रयच्छमे
ह्रींवैश्णायैनमःस्वाहाक्लूंह्रांसंशोधयेत्ततः नमस्ता
मिनमस्तामियोगमार्गप्रबोधिनि त्रैलोक्यविजये
मातःसमाधिफलदाभव ह्रींक्लूंह्रायैनमःस्वाहाॐअ
मृतेअमृतोद्भवेअमृतवर्षिणिपदंततः अमृतमाक
र्षयद्वन्द्वसिद्धिंदेहिततःपरम् अमुकंमेनतोब्रुयात्
वशमानयततःपरम् ठिद्वान्तोयंमन्त्रःप्रोक्तश्चतुर्द्दी
नांचशोधयेत् उत्तरंतंत्रेच मूलमंत्रंततोदेवितस्याप
रिनियोजयेत् आवाहनादिमुद्रांचयेद्योनिततःप
रम् दिग्बन्धछोटिकाभिस्तालत्रयपुरःसरः दिव्य
दृष्ट्यातथापार्ष्णिघातैर्विघ्नान्विघातयेत् समयान
पयेद्भक्त्यास्येमूलंजपेन्मनुम् गुरुपद्मेसहस्रारेत
थासंकेतमुद्रया त्रिधेवतर्पयेन्मंत्रीसाधकःसिद्धि
मानसः ऐंवदवदपदंब्रुयात्वाग्वादिनिततःपरम्
ममजिह्वाग्रेस्थिराभवसर्वदपदंततःसर्ववशंकरीस्वा

श्या देति मंत्रेण गुरुं ध्यात्वा संकेतमुद्रया तत्त्वमुद्रया र
२ मर्थः अथ साधकः वामकर्णे हुं अमुकानन्दनाथश्री
४ भैरवगुरुपादुकाभ्यो नमः दक्षिणकर्णे हुं गां गणप
तिमध्ये इष्टदेवतां नमस्कृत्य सामामोदकेन पूजास्था
नादिकमभ्युक्ष्य दक्षिणे गंधपुष्पादिकं वामे मद्या
दिजलं देवतायाद्रव्याणि अग्रस्थानं च देवतावामे धार
येत् तदंके कुलवृक्षमणि कुलासनं ततो दत्वा तद
र्ध्वे च यथास्थानम् कुलासनं ततो वक्ष्यागुरुपूजाक्रमे
ण च आत्मशुद्धिं पीठशुद्धिं प्राणशुद्ध्यादिभैरव कृ
त्वा चार्घ्यं ततो विद्याकर्ष्यान्कलविवेष्टितम् दीक्षिता
भिः कुलीनाभिर्युवतीभिः कुलात्मभिः देवतागुरुभ
क्ताभिर्बोधितं पानभूमिषु नानाविधानि पुष्पाणि
गन्धानि विविधानि च कर्पूरजातीयूपादिवासित
पटवासितम् तांबूलेट्य द्रव्यं च धूपदीपादिकं चयत्
सर्वालंकारभूषाभिर्भूषितः कौलिकेश्वरः मूलम
त्रजपतोयैः प्रोक्षितं स्थापयेत्ततः सर्वेषां दक्षिणे स्था
प्य वामे चार्घ्यं निवेदयेत् पश्चिमे देवतायाश्च कुलद्र
व्याणि धारयेत् पश्चिमे पृष्ठ इत्यर्थः कालिकापुराणे
पि मदिरां पृष्ठतो दद्यात् मधुपात्रं च वामतः कुलार्णवेपि
आत्मस्थानमनुद्धृत्य देहशुद्धिस्तु पंचमी यावन्न क्रियते

देविनावदेवार्च्चनंकृतः मालिनादेहशुद्धिस्तुप्राणा
यामादिभिःप्रिये षडंगानिमयेसन्मंत्रोआत्मशुद्धिरि
तीरिता गृहीत्वामातृकावर्णमूलमंत्राक्षराणित
क्रमोत्क्रमाद्विरावृत्तिर्मंत्रशुद्धिरितीरिता शंखाद्या
दिसंप्रोक्ष्यमूलास्त्राभ्यांविधानतः धेनुमुद्रांदर्शयेद्
द्रव्यशुद्धिरितीरिता पीठेदेवींप्रतिष्ठाप्यसकलीकृत्य
मंत्रवित् मूलमंत्रेणदीमात्मात्रिभिर्मायोदकेनच
त्रिवारंप्रोक्षयेद्विद्वान्देहशुद्धिरितीरिता पंचशुद्धिवि
धायेत्थंपश्चाद्यजनमाचरेत् अन्यत्रापि पंचशुद्धि
विहीनेनयत्कृतंतेनचतत्कृतम् पंचशुद्धिविनापू
जाभिचारायकल्पते आत्मशुद्धिःस्थानशुद्धिर्मंत्र
स्यशोधनंतथा द्रव्यशुद्धिर्देहशुद्धिःपंचशुद्धिरितीरि
ता अथकुमारीकल्पे पुष्पाधिष्ठानेपुष्पस्यप्राणंवै
पूर्वमुद्धरेत् ततोभिषेकेतिपदंशान्ताभीतिततःपरम्
अनेनमनुनादेव्याःपुष्पाधिष्ठानमेवच प्राणंपुष्प
केतस्मात्तथाराजाईतेपिच शान्तायसम्प्रोक्षाचसंव
ह्रायततश्चओं पुष्पेपुष्पेमहापुष्पेसुपुष्पेपुष्पसंभ
वे पुष्पचयावकीर्णेहुंफट्स्वाहेतितत्परम् विशोद्ध
पुष्पमेतेनजलंपूर्ववदाहरेत् ओंशान्ताभिषेकओंशा
न्ताभिषेकहुंफट्स्वाहेतिमंत्रेणपुष्पमधिष्ठापयेओंपु

श्या ष्फेकेतराजाईतेशानायसम्यक्मंवहाय इतिपुष्प
२ मभिमंत्र्यपूजाद्रव्यादिकंमूलेनतेफडित्यनेनाभ्यु
॥ येत्पुष्पयाश्रमतीकृत्यवामपार्ष्णिघाततत्रयंफड़ि
ति भूमौकृत्वातर्जनीमध्यमाभ्यांतुर्च्चैर्हस्ततालत्रयं
दत्वातर्जनीमंगुष्ठाभ्यांछोटिकाभिर्दशदिग्बंधनंकु
र्यात् दिव्यदृष्ट्यादिव्यानविघ्नान्उत्सार्यारमितिच
तर्दिग्दत्तवह्निप्राकारंध्यात्वामूलमंत्रेणस्वदेहंसमा
र्प्यप्राणायामंकुर्यात् यथामूलाधारे मनःसंयो
ज्यदक्षिणांगुष्ठेनदक्षिणनासापुटंधृत्वा मूलमं
त्रंप्रणवंवाषोडशवारंजपन् वामेनवायुमापूर्य
कनिष्ठानामाभ्यां वामनासापुटमपिविधृत्यतत
मेवचतुःषष्टिवारंजपन् वायुंकुंभयित्वापुनस्तद्वा
त्रिंशद्वारंजपन् दक्षिणेनवायुंरेचयेत् एवंक्रमो
त्क्रमेणप्राणायामत्रयेकृतेएकःप्राणायामः इमं
वारत्रयंकुर्यात् तदुक्तंस्वतंत्रे पार्ष्णिघातकरास्फो
टस्मृतोचितवक्रकैः तालत्रयमथोदद्यात्सशब्दं
संप्रदायच अतचंद्रनेत्रवामैर्बीजैर्वेदायकैः
प्रिये मात्राभिःप्रणवंजप्त्वापूरकुंभकरेचकैः प्राणा
यामंततःकृत्वाभूतशुद्धिंततश्चरेत् अत्रापि म
नोजीवात्मनःशुद्धिःप्राणायामेनजायते कालीत

ऽपि प्राणायामत्रयं कुर्य्यात् मूलेन प्रणवेन वा आ
नाण्यपि कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधार
णम् प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना
श्रध्योगोतमीये भूतशुद्धिं लिपिन्यासं विना यस्तु प्रपू
जयेत् विपरीतफलं दद्यादभक्त्या पूजनं यथा ततो भू दम
तशुद्धिं कुर्य्यात् तथा मूलाधारपद्मात् कुलकुण्डलि
नीं प्रसुप्तभुजगाकारां सार्द्धत्रिवलयां स्वयंभूलिंग
वेष्टिनीम् विषतन्तुतनीयसीं तडित्पुंजप्रभां हंसम
न्त्रेण पृथ्वीमामस्वाधिष्ठाने समानीय तत्र
स्थजले पृथ्वीं विलीनां विचिंत्य तस्माज्जलेन स
ह मणिपूरस्थवह्नौ तज्जलं विलीनं विचिंत्य तस्मान्म
णिपूरात् वह्निना सह अनाहतमानीय तत्रस्थवायौ
वह्निं लीनं ध्यात्वा तस्मान्मरुता जीवात्मना सह वि
शुद्धस्थाकाशे वायुं लीनं कृत्वा तस्मादाकाशेन स
ह आज्ञाचक्रस्थमनसि आकाशं लीनं विचिंत्य
मनो नादे लीनं विधाय धरणौ ध्वनिं समर्पयेत् त
तः सहस्रदलकमलकर्णिकास्थचन्द्रमण्डलम
ध्यत्रिकोणान्तर्गतबिन्दुरूपपरमशिवकुण्डलि
नी जीवात्मानं च निमेषरूपतां विभाव्य प्राणाया
मविधिना यमिति वायुबीजं धूम्रवर्णं षोडशवा

श्या ंजपन् वायवुरूपेण सह शरीरं संशोष्य रमिति व
१ ह्निबीजं रक्तवर्णं चिन्तषष्टिवारं जपन् तं संदह्य वमि
१२ ति वरुणबीजं शुक्लवर्णं द्वात्रिंशद्वारं जपन्नम्बा
मृत वृष्ट्या निष्पापं शरीरं उत्पाद्य लमिति पृथ्वीबी
जेन पीतवर्णं ध्यायेन शरीरं सुदृढीकृत्य सोऽहमि
ति मन्त्रेण कुलकुण्डलिनीमम तलीलां पञ्चभूतजी
वात्मानं च ब्रह्मपथेन स्वस्वस्थाने नियोजयेत् तदा
देवीरूपमात्मानं ध्यात्वा हृदि हस्तं निधाय जीवं म
मेत् यथा ओं ह्रीं क्रों हंसः श्रीदक्षिणकालिकायाः
प्राणा इह प्राणाः ओं ह्रीं क्रों हंसः अमुष्या जीव इह
स्थितः ओं ह्रीं क्रों हंसः अमुष्याः सर्वेन्द्रियाणि ओं ह्रीं
क्रों हंसः अमुष्या वाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणा
इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति जीवं समेत्
तदुक्तं स्वतन्त्रे संहारक्रमयोगेन पंचतत्त्वं समुद्धरेत
शोषदाहप्लवान् कृत्वा वायुग्निसलिलादिभिः ततो मा
सृष्टकृद्वीत फेत्कारीतन्त्रेरितम् अमन्त्रापि देवीरू
पं ततो ध्यायेदात्मानं कमलेक्षणं ततो जीवं
प्रविश्य पाशादिसन्दरेणान प्राणमन्त्रेण अमुके व
तोऽमुष्याः पदं ततः प्राणा इति पदं पश्चादिह प्राणाः
पदं ततः सर्वेन्द्रियाण्यमुष्यां ते वाङ्मनो नयनं ततः

श्रोत्रघ्राणपदात्प्राणाः इहागत्य सुखं चिरम् तिष्ठन्तु व
ह्निजायान्तः प्राणमंत्रोऽयमीरितः प्रकारान्तरं वक्ष्या
नाणेवे विपरीतं प्राणमंत्रं विलिख्य माषपूर्वकम्
प्राणप्रतिष्ठामंत्रोऽयं सर्वकर्माणि साधयेत् अष्ट
धाऽऽइति पदानि वाह्व्यानि इति सांप्रदायिकाः अष्ट
धाः स्थाने षष्ठ्यन्तं नाम प्रयोक्तव्यं तदुक्तं नारायणी
ये अष्टकपदं यद्रूपं यंत्रमंत्रे प्रवर्त्तते साध्याभि
धानं तद्रूपं तत्र स्थाने नियोजयेत् कुमारीकल्पे पि
भूतशुद्धिं विधायैवं देवीरूपेण चिन्तयेत् ॐ आं ह्रीं
क्रों फट् स्वाहा अनेन कायवाक्चित्तशोधनं कृत्वा र
त्नं फट् स्वाहा अनेन हृदि हस्तं दत्त्वा आत्मरक्षां वि
धाय स्ववामे ललितारूढे देवतां नवयौवनगर्वितां स
विधाय भूतशुद्धिं प्राणायामान्कारयित्वा यथोक्त
माचरेत् तदुक्तं तत्रैव प्रणवं पूर्वमुच्चार्य विशोध
नमेव च ऊं फट् स्वाहा मंत्रः प्रोक्तः कायवाक्चित्त
शोधने रत्नं फट् ततः स्वाहा मंत्रः स्यादात्मरक्षणे
ततः षोडशवर्षीयां नारीमानीय मंत्रवित् युवतीं
वामदेशे संस्थाप्य वेश्यां वा प्रहासिनीम् सदाकामा
भिलाषितां सिन्दूरांकितभालिकाम् साधके प्रेमसं
पन्नां वामे संस्थापयेद्बुधः तस्याश्च भूतशुद्ध्यादीन्कु

श्या न्यासेतमातृकांमसेत् प्राणायामंमातृकांचकारयित्वा
र यथाविधि अथऋष्यादिन्यासंकुर्य्यात् यथा कृतां
१२ जलिः भैरवऋषिरनुष्टुप्छन्दः श्रीदक्षिणकालि॰
13 कादेवता ह्रींबीजं हूंशक्तिः क्रींकीलकं रक्षार्थका
ममोक्षपुरुषार्थचतुष्टयसिद्धिपूर्वकदिव्यज्ञानद्रु
तकवित्वपाण्डित्यसिद्धयेविनियोगः इत्यभिलप्य
पुष्पेनानामयावामसेत् यथाशिरसि भैरवऋषये।
नमः मुखे अनुष्टुप्छन्दसेनमः हृदि श्रीदक्षिणका
लिकायैनमः गुह्ये ह्रींबीजायनमः पादयोः हूंश
क्त्यैनमः सर्वांगे क्रींकीलकायनमः तदुक्तम्
भैरवोऽस्यऋषिः प्रोक्तः उष्णिक्छन्दउदाहृतम् दे
वताकालिकाप्रोक्ता लज्जाबीजंतुकीलकम् शक्ति
स्तु कूर्च्चंबीजंस्यादनिरुद्धसरस्वती कवित्वार्थेविनि
योगःएवमृष्यादिकल्पना कवित्वार्थेविनियोगः इ
ष्टपलक्षणम् यद्यस्याभिलषितंतदर्थेविनियो॰
गः इत्यर्थः तंत्रेविविधश्रवणात् तदुक्तंकालीक्रमे
कीलकंचाद्यबीजंतुचतुर्वर्गार्थसिद्धये कुलचूडा
मणौ भैरवोऽस्यऋषिः प्रोक्तः उष्णिक्छन्दउदीरितं
दक्षिणकालिकादेवीचतुर्वर्गफलप्रदा अथतंत्रा॰
न्तरे ऋषिंन्यसेन्मूर्द्धिदेशे छन्दस्तुमुखपंकजे देव

तां हृदये चैव वीजं तु गुह्यदेशके शक्तिस्तु पादयो।
श्चैव सर्व्वांगे कीलकं न्यसेत् गौतमीये ऋषिछंदे
ऽपरिज्ञानान्न मंत्रफलभाग्भवेत् नैवीर्य्यं याति मं
त्राणां विनियोगमजानताम् अथ करांगन्यासौ ॐ
ह्रां अंगुष्ठाभ्यां नमः इत्यंगुष्ठयोः ॐ ह्रीं तर्ज्जनीभ्यां स्वा
हा इति तर्ज्जन्योः ॐ ह्रूं मध्यमाभ्यां वषट् इति मध्यम
योः ॐ ह्रैं अनामिकाभ्यां हुं इति अनामिकयोः ॐ ह्रौं
कनिष्ठाभ्यां वौषट् इति कनिष्ठयोः ॐ ह्रः करतल
करपृष्ठाभ्यां नमः इति करतलकरपृष्ठयोः इति
करन्यासः अथवा सर्व्वत्र नमस्कारांतेन करन्यासः
ततः ॐ ह्रां हृदयाय नमः इति हृदि तर्ज्जनीमध्य
मानामिकाभिर्न्यसेत् ॐ ह्रीं शिरसे स्वाहा इति शिर
सि तर्ज्जनीमध्यमाभ्यां ॐ ह्रूं शिखायै वषट् इति शि
खायां मुष्टिकृतायामंगुष्ठेन ॐ ह्रौं नेत्रत्रया
य वौषट् इति नेत्रत्रये तर्ज्जनीमध्यमानामिकाभिः
ॐ ह्रः करतलकरपृष्ठाभ्यां फट् इति करतलक
रपृष्ठयोः ततः ॐ ह्रः अस्त्राय फट् इमनेन तर्ज्ज
नीमध्यमाभ्यां मूर्द्धादिपादांतं तालत्रयं दत्वा छो
टिकाभिर्द्दशदिग्बन्धनं कुर्य्यात् तदुक्तं कालीतंत्रे
अंगन्यासकरन्यासौ यथावदभिधीयते षड्दीर्घ

प्रणा भाज्ञाबीजेन प्रणवाद्येन कल्पयेत् हृदयाय नमः
र प्रोक्तं शिरस्येव वह्निवल्लभा शिखायां वषडित्युक्तं क
१४ वचाय हुं मीरितम् नेत्रत्रयाय वौषट् स्यात् अस्त्राय फ
ट् प्रकीर्तितम् बीजमन्त्राद्य बीजेन तत्पारिभाषिक
म् तन्त्रान्तरे स्मरस्यात् स्वतन्त्रेपि प्रणवं वाद्य बीजेच
षड्दीर्घस्वरभाषितम् कृष्णामहङ्गविन्यासमल
खण्डत्रयेण वा अथ प्रकारः आद्यसप्तबीजेन हृदय
द्वितीयखण्डषट्स्वरेण शीर्षम् तृतीयखण्डेन वा
स्वरेण शिखायाम् पुनराद्येन कवचम् द्वितीयेन ने
त्रत्रयम् तृतीयखण्डेनास्त्रम् इत्यंगन्यासं कृष्णी
ते भैरवतन्त्रेपि षडङ्गानि न्यसेन्मन्त्री त्रिः सकृद्वाय
थाक्रमम् अथ वर्णन्यासं कृष्णोत अं आं इं ईं उं ऊं ऋं ॠं
लृं ॡं नमो हृदि एं ऐं ओं औं अं अः कं खं गं घं नमो दक्ष।
भुजे ङं चं छं जं झं ञं टं ठं डं ढं नमो वामभुजे णं तं थं
दं धं नं पं फं बं भं नमो दक्षजंघायाम् मं यं रं लं वं शं षं
सं हं ळं नमो नमो वामजंघायां न्यसेत् तदुक्तं काली
तन्त्रे एवं यथाविधिं कृत्वा वर्णन्यासं समाचरेत् अ
आइईउऊऋॠलृॡवै हृदये न्यसेत् एऐओऔ
नः अंअः कवर्गं च पुनस्ततः ङकावदक्षिणभुजे
स्पर्शेत्साधकसत्तमः ङचछजझञटठडढ नत्था

पुनः इतिवामभुजेन्यसेणतथदधनःस्मरेत् पन
वफबभम्हृदिणेजंघकेन्यसेत् मयरलवशषस
हलवामजंघके तथैतल्लिखितवर्णस्मरसात वि
न्दुरहितवर्णान्मासः विन्दुपात्मतेतत्सविन्दुरेवा
न्यासप्रमाणं नउक्तंकवचेलिखितमासः ऋषिब्र
ह्माभवेच्छन्दोगायत्रीमातृकापुनः देवतामंत्रंजंनं
वीजंशक्तयस्तुस्वरास्ततः अव्यक्तंकीलकंज्ञेयं
न्यासउक्तःक्रमेणतु उक्तः इतिपूर्वोक्तअध्यादिक
मवत् क्रमेणन्यसेदित्यर्थः षडंगंमातृकायाश्च
साधकःकारयेत्ततः स्वराणांक्लीवहीनानांस्मर
ल्लृरहितानामित्यर्थः एवंविधिनामातृकाषडं
गंकृत्वाध्यायेत् यथा शारदपूर्णेन्दुशुभ्रांसकु
लगुणमयीलोलरक्तत्रिनेत्रां शुक्लालंकारभूषा
प्रांशिशुकुटजटाटोपयुक्तांप्रसन्नाम् पुस्तकं
स्रक्पूर्णकुंभावरमपिदधतीशुक्लपद्मावराणां
वाग्देवीपद्मवक्त्रांकुचभरनमितांचिंतयेत्साधके
न्द्रः एवंध्यात्वाललाटादिक्रमेणअकारादिक्षका
रांतंक्रमेणन्यसेत् यथाश्रीक्रमे ललाटास्यंतथा।
वृक्षेवृष्टनेनयनद्वये श्रुतिनासापुटद्वन्द्वगण्डौष्ठ
द्वयकेपिच दंतयुग्मेचमूर्द्धास्येषडशो मोऽपविन्य

पूजा सेत् दोःपत्संधिषु साग्रेषु पार्श्वयुग्मे न्यसेत्पुनः २४
२ नाभिहृदये चैव जठरे विन्यसेद्ध त्वगासृङ्मांसमेदो
१९ स्थिमज्जशुक्राणि धातवः प्राणजीवो च परमो य
15 कारादिषु संस्थिताः एवं क्रमेण देवेशि न्यस्तव्या
एतदात्मिकाः हृद्दोर्मूले पि विन्यसेत्तथापरा
ले न्यसेत् करमूले हृदारभ्य पाणिपादयुगे तथा
जठराननयोर्व्यापि माससेदिमर्णोरूपिणीम् एवं ज्ञा
नार्णवे श्रमच्च ललाटमुखवृत्तनाली अष्टप्रयोगः
अं नमो ब्रह्मरन्ध्रे ललाटे वा आं नमो मुखवृत्ते ए
वं क्रमेण मकारपर्य्यन्तं विन्यस्य यं त्वगात्मने न
मः रं असृगात्मने नमः लं मांसात्मने नमः वं मेदआ
त्मने नमः वामांशे ककुदि वा शं अस्थ्यात्मने नमः
षं मज्जात्मने नमः सं शुक्रात्मने नमः हं प्राणात्म
ने नमः ळं जीवात्मने नमः क्षं परमात्मने नमः इ
ति विशेषः पंचाशदक्षरमासः क्रमेणैव प्रकाशि
तः श्रीं मायान्तो नमोन्ताश्च सविन्दुर्बिन्दुवर्ज्जितः
मायालक्ष्मीवीजपूर्व्वो मन्त्रमाउच्यते बुधैः लला
टे नासिकामध्ये विन्यसेन्मुखवृत्तके तर्ज्जनीम
ध्यमानामा हृद्वानानाच नेत्रयोः अंगुष्ठकर्णयो।
र्मस्य कनिष्ठांगुष्ठकौ नसोः मध्यमाल्लिसोगरयो॥

ष्ठमध्यमामोष्ठयोर्न्यसेत् अनामांदंतयोर्न्यस्य मध्य
मांगुत्तमांगके मुखे नामांमध्यमां च हस्ते पादे च
पार्श्वयोः कनिष्ठानामिकामध्यास्ताः पृष्ठेप्रविन्य
सेत् ताः सांगुष्ठा नाभिदेशे सर्व्वाः कुक्षौ च विन्यसेत्
हृदये च तलं सर्व्वं अंसयोश्च ककुत्स्थले हृत्सर्व्वं हस्त
पत्कलि मूर्द्धि तत्तलमेव हि एतास्तु मातृकाः शुद्धाः क्र
मेण परिकीर्त्तिताः अज्ञात्वा विन्यसेद्यस्तु मासःसा
नस्य निष्फलः अथ श्रीकंठमातृका यथा विन्यसेत्
मातृकास्थाने श्रीकंठादीन् यथाक्रमम् पूर्णोद
र्य्यादिभिः सार्द्धं मातृकाणां समन्वितान् श्रीकंठो
नंतः सूक्ष्मश्च त्रिमूर्त्तिरमरेश्वरः अर्घीशो भारभूति
स्थितिर्थीशः स्थाणुको हरः झिण्टीशो भौतिकः
सद्योजातस्त्वनुग्रहेश्वरः अक्रूरश्च महासेनः षो
डशस्वरमूर्त्तयः पश्चात्क्रोधीशचण्डेशपंचान्तक
शिवोत्तमाः अथैकरुद्रकूर्म्मैकनेत्रार्द्धचतुराननाः
अजेशः सर्व्वसोमेशस्तथा लांगलिदारुकौ अर्द्ध
नारीश्वरश्चोमाकांतश्चाषाढिदण्डिनौ अत्रिमीन
मेषाख्यलोहितश्च शिखी तथा छगलण्डद्विरण्ड
शौ महाकालवालिनौ भुजंगेशपिनाकीशख
ड्गेशाख्यबकेश्वरः श्वेतभृग्वीशनकुलिशिवाः सं

पूजा वर्त्तकः स्मृतः पंचरुद्राः स्मृता रक्ताः शूलकपाला॰
२ काः पूर्णोदरी स्याद्विजया शाल्मली तदनंतरम् लो
९ लाक्षी वर्त्तुला ह्यो च दीर्घघोणा समीरिता सुदीर्घमु
16 खी गोमुखी दीर्घजंघा तथैव च कुंभोदर्यूर्ध्वकेशी॰
व तथा विकृतमुख्यपि ज्वालामुखी ततो ज्ञेया पश्चा
दुल्कामुखी तथा श्रीमुखी च विद्यामुखिताः षोड
शशक्तयः महाकाली सरस्वसे सर्वसिद्धिसमन्विते
गौरी त्रैलोक्यविद्या च मंत्रशक्तिस्ततः परम् आत्म॰
शक्तिर्भूतमाता तथा लंबोदरी मता द्राविणी नाग॰
री भूयः खेचरी चैव मंजरी रूपिणी वारिणी पश्चात्
काकोदर्य्यपि पूतना स्याद्भद्रकाली योगिनी शंखि
नी गर्जिनी तथा सकालरात्रिः कुब्जिनी कपर्दिन्यपि
वज्रिनी जया च सुमुखेश्वर्य्या रेवती माधवी तथा
वारुणी वायवी प्रोक्ता पश्चाद्रक्षोविदारिणी तत
स्सहजा लक्ष्मी र्व्यापिनी मायया न्विता पंचरुद्रा॰
कपीठस्थाः सिन्दूरारुणविग्रहाः कोमलकपाला
खट्वांगलंकृतकराम्बुजा अथ प्रयोगः यथा ॐ श्री
कंठपूर्णोदरीभ्यो नमः इति ललाटे ॐ आं अनंतवी॰
जाभ्यो नमः इति मुखवृत्ते एवं क्रमेण सर्व्वं कुर्य्यात्
अथ षोढान्यासः तत्र क्रं वीरतंत्रे केवलां मातृका

कृत्वा मातृकां तारं संपुटाम् मातृकापुटितं तारं स
मेतत्साधकसत्तमः ॐ अं ॐ पर्वं तत्थैव मातृकापुटित
पर्वं कामपुटितं तत्पुटितं कामम् शक्तिपुटितं तत्पु
टितां शक्तिम् लज्जापुटितं तत्पुटितां लज्जाम् मंत्र
पुटितान्तत्पुटितं मंत्रम् पुरतुलोमविलोमतः के
वलं मंत्रं मातृकास्थानं मस्याष्टशतेन वाप्यपा
कं कुर्यात् इति गुप्तेन दुर्गायां श्रृगाषोढाप्रकीर्तिता
तारायाः कालिकायाश्च तत्कुर्यात्स्तत्थापि वा कृते
क्वासर्वयत्त सर्वपापं प्रणश्यति विषापमृत्युहरा
ण्यग्रहरोगादिनाशनम् उद्यमत्वाविनश्यंति शत्र
वो यांति मित्रताम् कविता लहरी तस्य द्वारस्य प
रंपरा अणिमाद्यष्टसिद्धिस्तु तस्य हस्तेऽवस्थिता
कायिकं वाचिकं वापि मानसं चापि दुष्कृतं सर्व
तस्य विनाशं त्वं याति मासमस्य चिंतनात् पुरस्कृत
त्वं यंयाति यत्किंचिद्रुपपातकं यद्धुपं दृश्यते यो
पि सतत्तुपं च गच्छति यं न मंतिम द्रश्यानि षोढापु
टित विग्रहः अस्मात्तुः सम वेत्सयो देवताकंपते भि
या अथ तत्न्यासः मूलविद्यास्वतंत्रे आत्मविद्या
शिवेत्त्वे तत्त्वन्यासं समाचरेत् अथ जीवन्यासं
कुर्यात् यथा कुमारीतंत्रे बलरात्रेष्वार्मध्येल

ध्या ललाटे नाभिदेशाके गुह्ये वक्त्रे तत्संयोगे सप्तबीजान्क्र
२ मान्न्यसेत् अथ प्रयोगः आद्यबीजमुच्चार्य्य नमो ब्र
१७ ह्मरन्ध्रे पंच द्वितीयबीजं भ्रुवि तृतीयं भाले चतुर्थं
नाभौ पंचमं गुह्ये षष्ठं वक्त्रे सप्तमं संयोगे न्यसेत् त
तः प्रणवपुटितमूलेन व्यापकन्यासं कुर्य्यात् नव
धा सप्तधा पंचधा वामस्तकादिपादपर्य्यंतं पादा
दिमस्तकांतं न्यसेत् तदुक्तं भैरवतंत्रे पंचधा नवधा
वापि मूलेन सप्तधा तथा व्यापकं कुर्य्यादित्यादि स
तंत्रेपि मूलेन व्यापकं न्यासं नवधा कारयेत्प्रिये इति
महामहोपाध्याय श्रीपरमहंसपरिव्राजक श्रीपू
र्णानंदगिरिविरचिते ध्यानमारहस्ये माघांतविवर
णे नाम प्रथमः परिच्छेदः १ अथांतर्यजनं वक्ष्येहं दृष्टा
दृष्टफलप्रदम् गुरुध्यानं प्रकुर्वीत यथापूर्वं विशा
लधीः स्नायाच्च विमले तीर्थे पुष्करे हृदयाश्रिते वि
नु तीर्थेन वा स्नायात्सु नर्जन्म न विद्यते ईडासुषुम्ने
शिवतीर्थकेऽस्मिन् ज्ञानांबुपूर्णेऽथ वहतः शरीरे
ब्रह्मांबुभिः स्नाति तयोः सदा यः किं तस्य गांगैरपि पु
ष्करैर्वा इति स्नानम् शिवशक्त्योः समायोगो यस्मि
न्काले प्रजायते सा संध्या कुलनिष्ठानां समाधि
स्थैः प्रतीयते इति संध्योपासनम् अथ मूलाधारा

न्कुलकुण्डलींसोमसूर्याग्निरूपिणीम् समुत्थाय
परबिन्दुनिर्भिद्यदेहदेवतांतर्पयेत् तदुक्तम् वन्हिको
नलसंमुत्थाकुलिनेयमरामृतम् तेनामृतेनदेहस्थेन
तर्पयेत्तेनदेवताम् इतितर्पणम् वह्निरूपाद्योभा
गेयद्वान्हपात्रस्नुतममृ कलामाप्यनसंपूर्णंतर्पये
तेनविवशीम इमर्द्धमाप्यनम् आधारेलिंगनाभौहृ
दयसरसिजेतालुमूलेललाटे द्वेपत्रेषोडशारेद्वि
दशादशादलेद्वादशार्द्धेचतुष्के वासांतेवालमध्ये
डफकठसहितेकंठदेशेस्वरांश्च हक्षौकोदण्डमध्ये
मसतुविमलधीर्मासमस्यातिसिद्धौ इतिमातृका
णींन्कंठच्छदक्रमेणध्यायेत् अथषडंगन्यासः त
दुक्तंगौतमीये इममाननदर्थो ऽयंहृदयेस्याच्चिदा
त्मकः क्रियतेनमस्त्वेनहृन्मंत्रेणततःपरम् सर्व
त्रादिगुणोत्वंगेसंविद्रुपेपरात्मनि क्रियतेविषया
हारःशिरोमंत्रेणदेशिकः स्वच्छिरोरूपसिद्धाममम
यताभावनाटत्वा क्रियतेनिजदेहस्यशिखामंत्रेण
देशिकः मंत्रात्मकस्यदेहस्यमंत्रवाच्येनतेजसा
सर्वतोयस्यमंत्रेणग्रहस्यहनिसंहतिः इतिग्रहिंस
नीयवन्हिलक्षणम् यत्रक्षणेहिंसाणांहिंसोपायान
प्रवर्ततेइत्यर्थः योददातिपरंज्ञानंसंविद्रुपेपरात्मनि

शण हृदयादिमध्ये तेजःस्यादेतन्मेत्र संस्थितम् आध्यात्मि
२ कादिरूपेयत्साधकस्य विनाशयेत् अविद्याशतमं
१८ त्रितमस्थामसमीरितम् इतिषड्गमासंविधायध्या
18 नेकुर्य्यात् यथा उदयाकरपदसंस्था शक्तिहृदयपुटांत
स्थलत्तदयम्हसंस्थितम् ज्योतिस्तन्मध्येध्यायेत्क
लाकुलनियोजनात् अथवाष्टागदृदयमध्यस्थश
क्तिहृदयपुटीकृतम् सदासमरसंध्यायेत्कालेनतत्कल
योगिनाम् अमत्त किरणस्यनदृग्निस्थवन्भास्क
रमध्यगम् महासूक्ष्मेनयत्कृत्वापूर्णास्तिष्ठतियोगि
राट् महासूक्ष्मइति सर्वोपाधिविनिर्मुक्ते पूर्णइति
सर्वोपाधिविनिर्मातान् विभागविरहात्पूर्णएव
भवतीति अथवा निरालंबपदेसूक्ष्मेयत्तेजउपपद्यते
तदर्भमिति अंतःकरणस्य अभ्यसेदिति वारंवारंकु
र्य्यादित्यर्थः इतिध्यानम् अद्वयन्निषधेः पुष्पैस्तान्त
णान्तन्मयोभवेत् मासस्तन्मयतावुद्धिः सोहंभावे
नपूजयेत् तन्मयेति तदेवात्मतत्त्वज्ञानम् सोहमिति
तत्वंपदशोधणार्थ्यपरिचिंतनमात्रपूजोपकरणमि
त्यर्थः विषयपुष्पाणियथा अमायामनहंकारम
वादामपदंतथा अमोहकमदंतेचनलेषांद्दोभकंत
था अमात्सर्य्यमलोभंवदशपुष्पविदुर्बुधाः अहिंसा

परंपुष्पंपुष्पमिन्द्रियनिग्रहम् दयापुष्पंक्षमापुष्पं
ज्ञानपुष्पंचपंचमम् इत्यष्टसमनभिःपुष्पैःपूजयेत्परमे
श्वरीम् इतिपूजनम् मालापंचाशिकाप्रोक्तासूत्रंश
क्तिशिवात्मकम् ग्रथिताकुण्डलीशक्तिःकलंस्तेमेरु
संस्थितः एवंविधिनावर्णमालामुपकल्प्यसत्तमेरुरूपं।
कृत्वाअकारादिलकारांतेलकारादिश्रीकंठांतंमूल
मंत्रंजपित्वापरतेजसिसमर्पयेत् अथहोमः आत्मा
नमपरिच्छिन्नंविभाव्यांतरंवापरमात्मज्ञानात्मस्व
रूपंचतरसंचित्कुण्डमानन्दमेखलायुतम् अर्द्ध
मात्राकृतयोनिभूषितंनाभौध्यात्वातन्मध्यस्थज्ञाना
ग्नौजुहुयात् यथामूलांतेनाभौचैतन्यरूपाग्नौहवि
षामनसास्रुचाज्ञानप्रदीपितेनित्यमक्षवृत्तिर्जुहो
म्यहंस्वाहा मूलांतेधर्माधर्महविर्दीप्तआत्माग्नौ
मनसास्रुचा सुषुम्नावर्त्मनानित्यमक्षवृत्तिर्जुहोम्य
हंस्वाहा इतिद्वितीयाहुतिंदत्वामूलांतेप्रकाशाका
शहस्ताभ्यामवलंब्योन्मनीस्रुचा धर्माधर्मकल
स्नेहपूर्णंवह्नौजुहोम्यहंस्वाहा अनेनतृतीयाहुतिं
दद्यात् ततोमूलांतेश्वेतनिरंजननिर्बन्धनमेयमाने
मायान्धकारपंक्तिनिसंविदग्नौ कस्मिंश्चिदद्भुतमरी
चिविकाशभूमौविश्वंजुहोमिवसुधादिशिवावसा

श्या नाम् इमं तर्पणं कृत्वा साक्षाद्ब्रह्ममयो भवेत् नानस्यपा
२ पशुणपानि जीवन्मुक्तो भवेद्ध्रुवम् इति श्रीश्यामारहस्ये
१९ द्वितीयः परिच्छेदः २ अथ साधककुलवेशं कृत्वा कु
19 लवेशं च कारयित्वा पीठन्यासं कुर्य्यात् तदङ्गं कुमारी
तत्र ततः स्त्रीवेशधारी स्यात् सिन्दूराङ्कितभालकः शृ
ङ्गारोज्वलवेशाढ्यस्ताम्बूलपरितानन: एवं वेशादिकं कृ
त्वा वनितामपि कारयेत् पीठन्यासं ततः पश्चादाधारश
क्तिपूर्वकम् प्रकृतिं कमठं चैव शेषं पृथ्वीं तथैव च
सुधाम्बुधिं मणिद्वीपं चिन्तामणिगृहं तथा श्मशानं पा
रिजातं च तन्मूले रत्नवेदिकाम् तस्योपरि मणेः पीठं
न्यसेत्साधकसत्तम: वटादित्त्रमुनीन्देवाञ्छिवाश्च शवा
न्गणेशकान् धर्म्मांश्चैव अधर्म्मांश्च पादगात्रचतुष्टये
पादगात्रचतुष्टयं स्त दक्षांश· दक्षउरु· दक्षजङ्घा· द
क्षपार्श्व· नाभि· वामपार्श्वे च हृदि कन्दं तथा पद्मसू
र्य्यसोमं महेश्वरि वैश्वानरं तथा सत्त्वं रजश्चैव तमस्त
था आत्मानं चैव विन्यस्य शक्तिरूपमनेकमप्यसेत् आ
त्मानमिति आत्मशब्देनात्मचतुष्टयमुच्यते शक्तिर्य
था इच्छा ज्ञाना क्रिया चैव कामदा कामदायिनी रती
रतिप्रिया नन्दा तथैव च मनोन्मनी वाग्भवं प्रथमं चो
च्चापयेत्तदनन्तरम् अपराये द्विरूपायै तस्योः वाच्याम

तः परम् सदाशिवमहाप्रेतेऽनन्तपद्मासनं तथा नम
श्शिवं मन्त्रोयं पीठमासमुदाहृतम् एवं पीठे देहमध्ये वि
नयेदिष्टदेवताम् अथातो कामकलारूपमात्मानः
विभावय मूलाधारात्कुण्डलिनीं परमशिवान्तगता
वह्न्यामृतेन सकलाम्बकारककुण्डलिकया सुषुम्णं गृहीत्वा
सुषुम्नया वा आहृदयाष्टदलसकंपद्ममध्ये ध्यायेत्
तदुक्तं स्वतन्त्रे अतः कामकलाध्यानमावाहकालि
कां शिवाम् कुम्भीस्वसुद्ध्याणुषुम्णक्रममध्ये नियाप
येत् अथ कामकला यथा सूर्यविन्दुवदाकारं तद
धः कुचयुग्मकम् सर्वविद्यामन्त्रपूर्णं सर्ववाग्विभ
वप्रदम् सर्वार्थसाधकं देवि सर्वजनकारकम्
तदधः सपरार्द्धं च सुपरिष्कृतमण्डलम् सर्वदेवादि
भूतां तः सर्वदेवनमस्कृतम् सर्वाह्लादसंपूर्णं स
र्ववशप्रवशकम् एतत्कामकलाध्यानं सुगोप्यं
साधकोत्तमैः श्रीक्रमेपि यासामयुमतीनाम्नामा
यामोहनकारिणी वासामध्यतरयोगेन चिन्तनीया
वतां स्मरण त्रैलोक्यमेकरूपेण स्वात्मानमेकरूपिणी
एकाकृतिस्वरूपेण सर्वाशान्ति विचिंतयेत् कामये
कामिणी सर्वादेवीमीश्वररूपिणीम् चिंतयेत्सुन्द
रीं देवीं सर्वव्यापककारिणीम् ईकारः सर्वमन्त्रः स्याद

श्या
२
२

20

वरः स्याच्चतुष्टयम् विन्दुत्रयस्य देवेशि प्रथमे देवि वक्त्र
के विन्दुद्वयं स्तनद्वन्द्वे हृदिस्थाने नियोजयेत् हकारा
र्द्धकलां सूक्ष्मां योनिमध्ये विचिन्तयेत् तथा कामकला
रूपां मदनाङ्कुरगोचरे उग्रघटादिमयं काशांशि नूणभां
स्तनद्वये विन्दुसंकल्पं वक्त्रे तत्स्फुरदीपशिखा प्रिये
आधाराद्ब्रह्मरन्ध्रान्तं तन्त्रमार्गेण भावयेत् कामो विन्दुरहं
देवि तत्रस्था परमेश्वरीम् शिवशक्तिमयं देवि तद्द्वयः
स्यात्कुचद्वयम् तदूर्ध्वः सपरार्द्धं च विन्दुरूपां परमां कला
म् सापि कुण्डलिनीशक्तिः कामकलास्वरूपिणी सा
शिवोवर्त्म गच्छन्ती भित्वा ग्रन्थिं च तद्देश प्रविश्य पर
मार्गेण सूक्ष्ममार्गस्वरूपिणी सापि च त्रिविधा सृष्टि
ब्रह्मविश्वस्वरूपिणी सर्वं स्मसाधकश्रेष्ठस्त्रैलोक्यं व
शमानयेत् एतत्ते कथितं देवि कामकलाविनिर्णयम्
गोप्तव्यं सर्वयत्नेन यदीच्छेदात्मनो हितम् अथ कूर्ममु
द्रा यथा कालिकापुराणे वामहस्तस्य तर्जन्यां दक्षिण
स्य कनिष्ठिकाम् तथा दक्षिणतर्जन्यां वामाङ्गुष्ठेन योज
येत् प्रोन्नतं दक्षिणाङ्गुष्ठं वामस्य दक्षिणादिकाः अङ्गु
लीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च वामस्य पितृतीर्थे
न मध्यमानामिके तथा अधोमुखे च ते कुर्यात् दक्षिणस्य
करस्य च एवं विधः सर्वसिद्धिं ददाति पाणिकच्छपः कू

ध्यात्वनयनाग्रतनिमील्यनयनद्वयम् सर्वकायशि
रोग्रीवंकृत्वास्थिरतरोबुधः ध्यानंसमारभेन्मंत्रीसर्व
पापविनाशनम् ध्यानंयथा स्वतंत्रे देव्याध्यानंप्रव-
क्ष्यामिसर्वदेवोपसेविताम् अंजनाद्रिनिभांदेवींकरा
लवदनांशिवाम् मुण्डमालावकीर्णांगींमुक्तकेशीं
स्मितानननाम् महाकालहृदम्भोजेस्थितांपीनपयोध
राम् विपरीतरतांशक्तांघोरदंष्ट्रांशिवैःसह नागयज्ञो
पवीतांचचन्द्रार्द्धकृतशेखराम् सर्वालंकारयुक्तांच
मुण्डमालाविभूषिताम् मृतहस्तसहस्रैस्तुकांची
वद्धांदिगंबरीम् शिवाकोटिसहस्रैस्तुयोगिनीभि
र्विराजिताम् रक्तपूर्णमुखांभोजांमद्यपानप्रमत्तकां
वह्न्यर्कशशिनेत्रांतवह्निविस्फुरिताननाम् विगता
सुकिशोराभ्यांकृतकर्णावतंसिनीम् कंठावशक्त
मुण्डालीगलद्रुधिरचर्च्चिताम् श्मशानवह्निमध्यस्थां
ब्रह्मकेशववन्दिताम् सद्यश्छिन्नशिरःखड्गवराभी
तिकरांबुजाम् तत्रवामोर्द्धहस्तेनकपालंतदधःशि
रः दक्षिणोर्द्धहस्तेऽभयंतदधोवरमिति तदुक्तंम
हाकालकृतस्तवे ऊर्द्धवामेकृपाणंकरकमलत
लेछिन्नमुण्डंतथाधः सव्येचाभीर्वरंचेति ध्यानांतरं
यथाभैरवतंत्रे करालवदनांघोरांमुक्तकेशींचतुर्भु

श्या नाम् कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम् स
२ द्यश्छिन्नशिरः खड्गवामाधोर्द्धकराम्बुजाम् अभयं वरदं चै
२१ व दक्षिणोर्द्धाधःपाणिकाम् महामेघप्रभां श्यामां तथै·
21 व चदिगंवरीम् कंठावशक्तमुण्डालीगलद्रुधिरचर्चि
ताम् कर्णावतंसतानीतशवयुग्मभयानकाम्
घोरदंष्ट्राकरालास्यांपीनोन्नतपयोधराम् शवानांक
रसंघातैः कृतकांचीहसन्मुखीम् सृक्कद्वयगलद्रक्त
धाराभिः स्फुरिताननाम् घोररूपां महारौद्रीं श्मशा·
नालयवासिनीम् दंतुरां दक्षिणव्यापिमुक्तालंबिक
चोच्चयाम् शवरूपमहादेवहृदयोपरिसंस्थिताम्
शिवाभिर्घोररावाभिश्चतुर्दिक्षुसमन्विताम् महाका
लेनचसमं विपरीतरतातुराम् भजेत्त्रिजगतां धात्री
स्मेराननसरोरुहाम् एवं संचिन्तयेत्कालीं धर्मका
मार्थसिद्धिदाम् अथ्यामयोरेकतरेण देवीं ध्यात्वा मा
नसोपचारैराराध्य पूर्ववज्जपहोमं कृत्वा नमस्कार·
स्तोत्रपाठं कुर्य्यात् यंत्रनिर्म्माणार्थं पात्राणि यथा मु
ण्डमालातंत्रे ताम्रपात्रे कपाले वा श्मशाने काष्ठनि
र्म्मिते शनिभौमदिने वापि शरीरे मृतस्य भवे स्वर्णे
रौप्येण लौहे वा चक्रमभ्यर्च्य यत्नतः स्वतंत्रेपि इत्थंवि
मलदेहः मन्त्रकृद्यंत्रमालिखेत् सुवर्णरजतेना

त्रेपाषाणेवाष्टधातौतु इति अथ बहिः पूजार्थम् वस्त्र
माणग्नान्याष्टकलिखे स्वर्णादिकुण्डगोलस्वयंभुकु।
सुमागुरुलिखेद्वा स्वर्णे रजतताम्रशलाकयाविन्दुकं
ठकेनपुष्पेणवामंत्रमुच्चरन् विन्दुमायावृतत्रिको
णंपंचवृत्ताष्टदलपद्मवत्तरसंवत्तधरात्मकम् यंत्र
राजंलिखेदिति सत्संप्रदायावदंति तथाचकालीतं
त्रे आदौत्रिकोणंविन्यस्यत्रिकोणंतद्बहिर्न्यसेत् त
तोवैविलिखेन्मंत्री त्रिकोणत्रयमुत्तमम् ततोवृत्तं
समालिख्यलिखेदष्टदलंततः वृत्तंविलिख्यविधिव
ल्लिखेद्भूपुरमात्मकम् इतिमतंत्रेपि स्वयंभुकुसुम
कुण्डगोलोत्थरोचनागुरु काश्मीरमृगनाभीचशि
लंचचन्दनद्वयम् एतद्गन्धः समाख्यातः सर्वदाकालि
काप्रियः एतेनगन्धयोगेनयोनिचक्रंसमालिखेत्
योनिद्वयंततःकुर्यात्कोणषट्कंततःप्रिये ततश्चा
ष्टदलंभूमिंवत्तद्वारैःसमन्वितम् एतत्कथितंचा
क्रमत्रपुष्पाञ्जलिंकिरेत् कुमारीकल्पेपि आदौत्रि
कोणंविन्यस्यत्रिकोणंतद्बहिर्न्यसेत् बहिस्त्रिकोण
मालिख्यकोषट्कंलिखेद्बहिः मध्येतुवैन्दवंचक्रं
वीजमायाविभूषितम् षट्कोणात्बहिर्वृत्तंततोऽ
ष्टदलकंलिखेत् बहिर्वृत्तेनसंयुक्तंभूपुरैकेनसंयुतं

श्या त्रानैवं मुक्तिमाप्नोति यंत्रराजेन संशयः एतत्तु विलि
१ खेनाष्टकुंकुमगोलविलेपिते स्वयंभुकुसुमैर्युक्तं कुंकु
२२ मागुरुसेविते ननु उक्तं पंचदशकोणकथमुक्तं स
22 न्तंत्रादिन्तत्रविरोधात् नचवाच्यं कालीतंत्रमतमि
ति तत्रैव पूजायां षट्कोणपदश्रुतेः तद्यथा काली
कपालिनीकुल्लाकुरुकुल्लाविरोधिनीम् विप्रचित्तां त
सम्पूज्य वह्निः षट्कोणके बुधः इति वह्निरूपादानां
व्यर्थमेव अतः षट्कोणाभावात् वचनान्तरदर्शना
च्च तथा कालीतंत्रे पंचशक्तिसमालिख्य अथोवा
कोमलदलाम् इति कालिकाश्रुतौ च त्रिकोणत्रि
कोणं नवकोणं पंचममिति कुलसंभवेपि त्रिकोणं
विन्यसेन्मध्ये पुनस्तस्यापि त्रिकोणकम् नवकोणपुन
स्तत्र तन्मध्ये स्थापयेच्छिवाम् तस्मात् षट्कोणमः
त्रशस्त्रात्मकमिति नन्वेवं त्रिकोणद्वयान्तर्गतं भैर
वीचक्रवन्नवकोणमनेनान्तरं स्यात् नैवं तदा तत्रैव
पूजायां महाविरोधः तद्यथा कुलसंभवे कालीक
पालिनीकुल्लाकुरुकुल्लाविरोधिनीम् विप्रचित्तां स
मेष्वेव वह्निः षट्कोणके बुधः उग्रामुग्रप्रभां दीप्तां प
रत्रिकोणके न्यसेत् नीलां घनां वलाकां च तथैवा
परके त्रिके मात्रां मुद्रां मितां चैव परत्रिकोणके बुधः

एतदुक्तं भवति षट्कोणावरणान्तेऽपरत्रिकोणके
ऽयावरणम् तथापरे त्रिकोणत्रयमपरं त्रयं यजेदि
त्यस्यार्थो भवत्येतेन त्रिकोणपत्रनाम्नैव त्रिको
णाष्टस्य केवल त्रिकोणात्मके शृंगाटके शक्तित्वात्
नववाच्यं नवयोनेर्बाह्यकोणाष्टकस्यैकैककोणप
दशक्तिरिति तत्त्रिपंचारपीठानुपपत्तिः समग्रचक्रपू
जाभावाच्च तस्मान्नवयोन्यात्मकमिति भावः वस्तुत
स्तु स्वतन्त्रादितन्त्रभेदात् षट्कोणान्तर्गतत्रित्रिको
णात्मकमपि यन्त्रान्तरं भवति यतः षट्कोणाष्टस्या
पारिभाषिके शक्तिरस्त्रलत्वेन नहि कोऽपि दृष्टप
रिकल्पनां विहायादृष्टं कल्पयति यत्तु कालीतन्त्रे ष
ट्कोणमुक्तं तत्तु तन्मते वोद्धव्यम् अन्यत्र कल्पनेमा
नाभावात् नचैकदैवतमन्त्रे यन्त्रद्वयकल्पनेविरोध
इति वाच्यम् तारातन्त्रे एकदैवतमन्त्रस्य विविधयन्त्रा
दर्शनात् एतत्तु तस्याः पूजायामग्रे लिखिष्यामः अ
थ स्वर्णादिसिंहासने पुरतो यथोक्तं यन्त्रं संस्थाप्य तदुप
रि पूजयेद्यथा ॐ ह्रीं आधारशक्त्यै नमः ॐ प्रकृत्यै न
मः ॐ कूर्माय नमः ॐ अनन्ताय नमः ॐ पृथिव्यै
नमः ॐ सुधाम्बुधये नमः ॐ मणिद्वीपाय नमः ॐ
चिन्तामणिगृहाय नमः ॐ श्मशानाय नमः ॐ पारिजा

पूजा नायनमः ॐरत्नवेदिकायैनमः ॐमणिपीठायनमः
१ दिक्षु ॐनमोदेवेभ्यःपरितः ॐवक्रमांसास्थिमोदमान
२३ शिवाभ्यः ॐशवमुण्डेभ्यः पूर्व्वादिवलर्दिक्षु ॐधर्म्मा
23 यनमः ॐज्ञानायनमः ॐवैराग्यायनमः ॐऐश्वर्य्या
यनमः ॐवन्ह्यादिदिक्षु ॐअधर्म्मायनमः ॐअज्ञा
नायनमः ॐअवैराग्यायनमः ॐअनैश्वर्य्यायनमः
मध्ये ॐअनन्तायनमः ॐपद्मायनमः ॐअंअर्कम
ण्डलायनमः ॐउंसोममण्डलायनमः ॐमंवह्नि
मण्डलायनमः ॐसंसत्वायनमः ॐरंरजसेनमः ॐ
तंतमसेनमः ॐआंआत्मनेनमः ॐअंअन्तरात्मनेन
मः ॐपंपरमात्मनेनमः ॐह्रींज्ञानात्मनेनमः पत्र
मूलेपूर्व्वादितः ॐइच्छायैनमः ॐज्ञानायैनमः ॐ
क्रियायैनमः ॐकामिन्यैनमः ॐकामदायैनमः
ॐरत्यैनमः ॐरतिप्रियायैनमः ॐआनन्दायैनमः
कर्णिकायाम् ॐमनोन्मन्यैनमः मध्ये ॐपंपरायै
नमः ॐपंअपरायैनमः ॐपंपरापरायैनमः ह्सौः
सदाशिवमहाप्रेतपद्मासनायनमः इतिपीठपूजां
कुर्य्यात् नमोऽन्तेनसर्व्वत्र ततःकलसस्थापनंकु
र्य्यात् तत्रलक्षणमाह तन्त्रान्तरे कलांकलांगृहीत्वा
तुदेवानांविश्वकर्म्मणा निर्म्मितोऽयंसुरैर्यस्मात्क

लसल्लिनउच्यते पञ्चपादोवर्ण्योल्लकलासेवनेइतिक
लसः सौवर्णंराजतंवापिमार्त्तिकंवायथोदितम् वा
लयेदस्त्रमंत्रेणाकुंभमस्यकत्रेस्थरि इतिस्वतंत्रे अथप्र
योगः स्ववामेविन्दुषट्कोणचतुरस्रंकृत्वासामान्यो-
दकेनाभ्युक्ष्यतत्रआधारशक्तयेनमः इतिपूजयेत् ततो
नमइतिक्षालितमाधारंतत्रनिधाय ॐमंवह्निमण्डलाय
दशकलात्मनेनमइतिसंपूज्य फडितिक्षालितचषंर
क्तवस्त्रमाल्यादिभिरलंकृतम् ॐइतिदेवीबुद्ध्यामंड
लोपरिनिधायअर्कमण्डलायद्वादशकलात्मनेनम
इतिसंपूज्यमूलमुच्चरन्नकारेणनतंसंपूज्यदद्यो ॐ
उंसोममण्डलायषोडशकलात्मनेनमइतिदत्वाफडि
तिदर्भैर्हुंमंत्रास्फंइसवगुंठ्यमूलेनवीक्ष्यनमःइम
भ्युक्षणंकृत्वामूलेनगंधमादाय ॐमितिमंत्रेणकुं
भेपुष्पंदत्त्वाशापमोचनंकुर्यात् तदुक्तंस्वतंत्रे ततः
स्वकारेणद्वयमसमानीयघटेस्थितम् वेष्टितंरक्तव
स्त्रेणरक्तमाल्येनभूषितम् वामभागेमहेशानिमं-
डलेचतुरस्रकम् ततःसंस्थापयेद्धर्म्यादेवीबुद्ध्या
वरानने मण्डलेकलसेद्धेववह्न्यर्कशशिमण्डलम्
स्तजयेदिमर्थः भावचूडामणौ स्ववामभागेषट्को
णंतन्मध्येवृत्तस्तथकम लिखित्वातत्रकुंभंवैसौव

श्यो एंराजंतंचवा ताम्रभूमिमध्यंवापियद्वालोहविवर्जितं
दे तंत्रांतरे आधारेस्थापयेन्मंत्रीसौवर्णेवाथराजतम्
२४ काष्टजंमृण्मयंवापियद्धटमव्रणशालिनम् सौवर्णे
24 भोगदंप्रोक्तंराजंतंमोक्षदंस्मृतम् कांश्यंकांतिकरंचै
वमृण्मयंपुष्टिदंभवेत् अथकाम्यशापविमोचनंकु
र्यात् तदुक्तंकुमारीतंत्रे अमन्त्रंशृणुदेवेशियथाया
नादिकर्म्माणि दोषानजायतेदेवितान्वैमंत्रान्शृण
ष्वमे एकमेवपरंब्रह्मस्थूलसूक्ष्ममयंध्रुवम् कचोद्भू
वांब्रह्महत्यांतेनतेनाशयाम्यहम् सूर्यमंडलसंभू
तवरुणमंडलसंभवे अमाबीजमयेदेविशुक्रशापा
द्विमुच्यताम् देवानांप्रणवोबीजंब्रह्मानंदमयंयदि तं
नसत्येनदेवेशिब्रह्महत्यांव्यपोहतु एवंमंत्रत्रयेणैव
अभिमंत्र्यसुरांशुभाम् प्रदद्यात्कालिकायैचततोदे
वयशुगभवेत् इतिमंत्रत्रयंह्यथोपरिविजपेत् ॐरां
रीं रूं रैं रौं रः ब्रह्मशापविमोचितायैसुधादेव्यैनमः इ
तिब्रह्मशापविमोचनेह्यथोपरिदशधाजपेत् ॐह्रीं
श्रींक्रांक्रींक्रूंक्रैंक्रौंक्रः सुराकृष्णशापंविमोचय
अमृतंश्रावयश्रावयस्वाहा इतिकृष्णशापविमोच
नेदशधाजपेत् यथोत्तरतंत्रे हंसःशुचिसद्वसुरंत
वींतंसद्धोतावेदीषदतिथिर्दुरोणसत् नृषद्वरसत्

सद्योमसद्ज्ञागोजाग्रतज्ञाग्रविज्ञाग्रतंतद्दहत इ
तिक्रवावारत्रयंघद्दममभिमंस्मतदुपरि आनन्द
भैरवोध्यायेत् यथा सूर्य्यकोटिप्रतिकाशं चन्द्र
कोटिसुशीतलम् अष्टादशभुजैर्युक्तं पंचवक्त्रं।
त्रिलोचनम् अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थि
तम् वृषारूढं नीलकंठं सर्व्वाभरणभूषितम् कपा
लखट्वांगधरं घंटाडमरुवादिनम् पाशांकुशधरं
देवं गदामूषलधारिणम् खड्गखेटकपट्टीशमुद्गर
शूलदंतकम् विचित्रखेटकंदण्डंवरदाभयपाणि
नम् लोहितं देवदेवेशं भावयेत्साधकोत्तमः एवं
ध्यात्वाहसद्दमलवरयूं आनन्दभैरवाय वषट्
इत्यानन्दभैरवं त्रिः संपूज्य आनन्दभैरवीं ध्यायेत्
यथा भावयेच्च सुधादेवीं चन्द्रकोटिसमप्रभाम्
हिमकुन्देन्दुधवलां पंचवक्त्रां त्रिलोचनाम् अष्टाद
शभुजैर्युक्तां सर्व्वानन्दकरोद्यताम् प्रहसंतीं विशा
लाक्षीं देवदेवस्य सम्मुखीम् एवं ध्यात्वा हसद्दम
लवरयीं सुधादेव्यै वौषट् इत्यानन्दभैरवीं संपू
ज्य तदुपरि त्रिकोणचक्रे विलिखेत् त्रिपंक्तिक
मेण आदि १६ कादि १६ थादि १६ हंलंक्षं मध्यल।
सितं विलिखेच्छिवशक्त्योः समायोगात् मध्ये

श्या अमृतत्वं विचिन्तयेद्गुरुरूपामृतीकृतं सर्वं इति वहृणा।
र वीजं मूलमंत्रं वाष्टधा तद्वपरिजपित्वा देवतामर्घ्यभाव
२५ येदिति द्रव्यशुद्धिः तदुक्तं स्वतंत्रे ततस्तु भावयेद्द्रव्यम
25 घ्येलक्तनिभं प्रिये अकथादिभिस्त्रिपंक्त्यात्तु हलत्वं
मध्यमण्डितम् पूर्वोक्तयोनिमुद्राया शिवशक्त्योः
समागमम् अमृतं चिंतयेद्द्रव्यमष्टधाप्यमृतं जपेत्
अष्टधा मूलमंत्रं च जपेत्तु त्वाद्यं ततः एतत्तु कारणं दे
विस्तरं सद्यनिषेवितम् अत एव तस्य नाम सुरेति श्रु।
वतत्रये अस्यगान्धः केशवस्तेन गान्धेन कौलिकः
न पूजयेत्सुरां देवीं दक्षिणां कालिकां शुभाम् ततः
शंखं वीभपात्रं स्थापयेन्मध्यभागतः श्रीविद्योक्त
क्रमेणैव ततः पूजां समारभेत् समयाचारेऽपि सा
मान्यार्घ्यं ततः कृत्वाप्यमासाधकोत्तमः तत्र ले।
मिण्डलं कृत्वा पात्राणि स्थापयेदथ कुमारीतंत्रेपि
ततोऽर्घ्यं कारयेन्मंत्री तथा नार्घ्यस्य विशेषया अर्घ्य
द्रव्यमर्घ्यपात्रे निःक्षिपेद्य ततः सुधीः कुण्डगोलो
द्भवं द्रव्यं स्वयंभूकुसुमं तथा नार्घ्यं सिद्धं जायते देवि
महामंत्रस्य साधने मुण्डमालायां च रक्तचन्दनवि
ल्वादि जवाकुसुमं वर्वरैः अर्घ्यं दत्वा महेशानि सर्व
कामार्थसिद्धये सुगाया अर्घ्यदानेन योगिनीनां।

भवेत्प्रियः महायोगी भवेद्देवि पीठप्रज्वालितैर्जलैः
स्वयंभूकुसुमैर्दत्तैर्भवेत्षट्कर्मभाजनः स्वशीतल
जलैर्वापि कस्तूरीकुंकुमान्वितैः कुण्डगोलोद्भवै
जैर्वा सर्वसिद्धीश्वरो भवेत् जवादिना कृतार्घेण स्व
दृशोधितद्रव्यं किंचित्क्षिपेत् तदर्घं श्रीक्रमे अर्घ
विधौ पूर्वं तच्छोधितं द्रव्यं गुप्तेन वक्त्रे संक्षिपेत् अथ
वातानां प्रकरणोक्तं शांभवस्थितितोयपूर्णं जवापुष्पं।
च बर्बरम् चन्दनं चार्ककुसुमं शुक्लं चैवापराजिता
स्नानं विशेषेणानि सपूजाकर्मस्मृतम् अथान्त।
यंत्रयोर्मध्ये ईकारगर्भं त्रिकोणं वृत्तषट्कोणं च।
तद्बहिर्विलिख्य चतुरस्रं पूं पूर्णशैलाय नमः उं उ।
ड्डीयानपीठाय नमः जं जालन्धरपीठाय नमः
कां कामरूपपीठाय नमः इति संपूज्य षट्कोणेषङ्।
गानि मूलखण्डत्रयेण त्रिकोणं प्रदक्षोनं संपूज्य
मध्ये आधारशक्तिं संपूज्य त्रिकोणवृत्तषट्कोण
भूषिताधारं तत्र संस्थाप्य नमः इति सामामामाध्योदके
नाभ्युक्ष्य तत्र वह्नेर्दशकलाः पूजयेत् यं धूम्रार्चिषे
नमः रं ऊष्मायै नमः लं ज्वालिन्यै नमः वं ज्वालिन्यै न
मः शं विस्फुलिंगिन्यै नमः षं सुश्रियै नमः सं सु।
रूपायै नमः हं कपिलायै नमः ळं हव्यवाहनायै नमः

श्या लंकव्यवहायैनमः इतिसंपूज्य मंवह्निमण्डलायद॰
२ शकलात्मनेअर्घ्यपात्रासनायनमः इतिसंपूज्यषट्
२९ कोणेषडंगमभ्यर्च्यमूलेनदेवीमीष्टकपालादि
26 पात्रंफडितिक्षालितं तत्राधारोपरिसंस्थाप्यसूर्य
मण्डलंतत्रयजेद्यथा कंभंतपिन्यैनमः खंबंतापि
न्यैनमः गंफंधूम्रायैनमः घंपंमरीच्यैनमः ङंनंज्वा
लिन्यैनमः चंधंरुच्यैनमः छंदंसुषुम्णायैनमः जं
थंभोगदायैनमः झंतंविश्वायैनमः ञंणंबोधिन्यै
नमः टंढंधारिण्यैनमः ठंडंक्षमायैनमः नमोऽन्तेन
संपूज्य अंअर्कमण्डलायद्वादशकलात्मनेअर्घ्यपा
त्रायनमः इतीष्टुत्रिकोणवृत्तषट्कोणंपात्रमध्ये
विलिख्यसमस्तव्यस्तमंत्रेणत्रिकोणंसंपूज्य वमिति
वरुणबीजंमूलमंत्रंविलोमसमातृकांचपठनघट॰
स्थकारणामृतेनत्रिभागामर्घ्यंसंपूर्य्यशेषंजलेन॰
पूरयेत् ततोदुर्वाक्षतरक्तचन्दनजवार्कपुष्पनाप
राजिताकरवीरबिल्वबदरीकुन्दसुगन्धिद्रव्याणि॰
शुद्धिमीनमुद्राकुण्डगोलादिकंचसंशोध्यतत्रनि॰
क्षिप्यसोममण्डलंपूजयेद्यथा अंअमृतायैनमः
आंमानदायैनमः इंपूषायैनमः ईंतुष्ट्यैनमः उंपु॰
ष्ट्यैनमः ऊंरत्यैनमः ऋंधृत्यैनमः ॠंशशिन्यैनमः

लंवह्निकायैनमः लंकांस्यैनमः पंस्त्रोतस्वायैना
मः पंश्रियैनमः ऊंप्रभायैनमः ऊंअगदायैनमः
अरुणायैनमः अः पूर्णामृतायैनमः ऊंसोमसमण्ड
लायषोडशकलात्मनेअर्घपात्रामृतायनमः इ
तिसंपूज्य पूर्ववद्यंत्रंकारणेलिखित्वात्रिकोणत्रि
रेखायां अ १६ कं १६ खं १६ मध्येहंलंदंविलिख्यमू
लविद्ययात्रिकोणमिष्ट्वाषट्कोणषडंगानि
संपूज्य ऊंगंगेचयमुनेचैवगोदावरिसरस्वति न
र्मदेसिन्धुकावेरिजलेऽस्मिन्सन्निधिंकुरु इमने
नांकुशमुद्रयासूर्यमण्डलात्तीर्थमावाह्यानंद
भैरवभैरव्यैस्तौकक्रमेणसंपूज्यपूर्वादिक्रमे
णपंचरत्नयजेद्यथा ह्लुंगगणमण्डलेभ्यः ह्लुं
स्वर्गरत्नेभ्यः ह्लुंपातालरत्नेभ्यः ह्लुंमर्त्यरत्नेभ्यः
ह्लुंनागरत्नेभ्यः इतिनमोऽन्तेनपूजयेत् अथैषा
मेद्रोऽपिलिख्यते तदुक्तंयामले मांसंतुत्रिविधं
प्रोक्तंजलभूचरखेचरम् गोधाचैवाश्वमहिषव
राहाजमृगोद्भवम् महामांसाष्टकंप्रोक्तंदेवताप्री
तिकारणम् मांसाभावेतदन्तकल्पंनिक्षिपेत् तदु
क्तंसमयाचारे लवणार्द्रकपिण्याकगोधूममांसप
चमम् लशुनंचमहादेविमांसप्रतिनिधौस्मृतम्

पपा मत्स्यं तत्त्रिविधं प्रोक्तं उत्तमाधममध्यमम् उत्तमं त्रि
२ विधं प्रोक्तं [illegible] द्विशालपाठीनरोहितः
२० प्रवीणकं ठकेहीनं तैलाक्तं स्वादुसंयुतम् देव्याः
27 प्रीतिकरं चैव मध्यमं स्याच्चतुर्विधम् त्वङ्गाणिता
नि सर्वाणि प्रथमा माकृत्तमाः मुद्राश्चि विधाय
थाकुलानि वै देवेशि पद्ममण्डलाकारं चन्द्रबिम्बनिभं
शुभम् वाहुपक्कं मनोहारि शर्कराद्यैः प्रपूरितम्
पूजाकाले देवताया मुद्रेयं परिकीर्त्तिता यामलेऽ
पि मृष्टधान्यादिकं यद्यच्चर्वणीयं चर्व्येयत् तेषा
मेताः कृताः मुद्रा महामोक्षप्रवर्द्धिनी कुलकुसुमभेद
त्वग्रे लिखिष्यामः अथैषां शुद्धिर्लिख्यते तदुक्तं भै
रवतन्त्रे ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कु
चरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षिय
ति भुवनानि विश्वाः अनया मांसमभिमंत्र्य ॐ त्र्य
म्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् उर्वारुकमिव ब
न्धनान्मृत्योर्मुक्षीय मामृतात् इत्यनया मत्स्यं सं
शोध्य ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दि
वीव चक्षुराततः तद्विप्रासो विपन्यवो जागृवांसः
समिन्धते विष्णोर्यत्परमं पदम् इत्यनया मुद्राम
भिमंत्र्य ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिं

घृत आसिंचत प्रजापतिर्धाता गर्भं दधातु ते गर्भं
धेहि सिनीवालि गर्भं धेहि सरस्वति गर्भं ते अश्वि
नौ देवावाधत्तां पुष्करस्रजौ ॥ सं ह्रूं म्लूं ह्रूं स्वाहा अ
मृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय स्रा
वय स्वाहा इति कलशोद्भवादिकमभिमंत्र्य सर्वं कु
मि सवं गुंठ्य धेनुमुद्रयामृतीकृत्य तालत्रयं दिग्ब
न्धनम् कृत्वा सर्वघटोपरि मूलमंत्रं सप्तधा जपे
त् इति मासादिशोधनम् ततः पं ह्रीं सौं ब्रह्माण्ड
रसंभृतमशेषरससंभवम् आपूरितं महापात्रं
पीयूषरसमावह अखण्डैकरसानन्दकरे परसु
धात्मनि स्वच्छन्दस्फुरणामत्र निधेह्यकुलरूपि
णि अकुलस्यामृताकारे शुद्धज्ञानकरे परे अमृत
त्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि तद्रूपेणै
करस्यं च कृत्वा ह्येतत्स्वरूपिणी भूत्वा परमृताका
रं मयि स्फुरणं कुरु एभिर्मंत्रैरर्घ्यमभिमंत्र्य मध्ये
कामकलां विलिख्य तत्रेष्टदेवतामावाह्य तालत्रयं
दशदिग्बंधनं कृत्वा कुमि सवं गुंठनमुद्रयावगुंठ
रमिति धेनुमुद्रयामृतीकृत्य योनिमुद्रां प्रदर्श्य हं
सो नमः इतीष्टां शांभवमुद्रां प्रदर्श्य षडंगेन सकली
कृत्य मत्स्यमुद्रयाच्छाद्य मूलमंत्रं तदुपरि दशधा।

पूप जलाद्देवतारूपमंत्रमावयेत् ततः पुष्पांजलित्रयं
१ दत्वा धूपदीपौ प्रदर्शयेत् इमं मंत्रमाधनेनसंहितमम
२८ सपूर्णप्रकारस्त्वमत्कृतत्वानन्दतरंगिण्यामन्त्रा
28 सप्तैयः शृगालसमासियावत्तावद्दंडेनवानयेत्
अथावगुंठनमुद्रायथाज्ञानार्णवे सव्यहस्तकृता
मुष्टिर्दीर्घाधोमुखतर्जनी अवगुंठनमुद्रेयमभितो
भ्रमितामता तदुक्तंतत्रैव मध्यमेगुटिकाकारे
नम्रपरिसंस्थिते अनामिकामध्यगतेतथैवहि
कनिष्ठिके समीपकत्रसंयोज्य अंगुष्ठपरिपीडिताः
योनिमुद्रासमाख्यातात्रैलोक्यमननिमातृका शि
खमुद्रायथा तत्रैवामुष्टिंतरेः कुंष्ठनियो
ज्यसरलांगुलीः दक्षिणस्यकरस्येववामांगुष्ठेन
मसृणेत् शिखमुद्रेयमाख्याता सत्रविद्विरनुत्तमा
देवतांगषडंगवसकलीकरणंभवेत् दक्षपाणिपृ
ष्ठदेशे वामपाणितलंक्षिपेत् अंगुष्ठौचालयेत्सम्य
ग्मुद्रेयंमत्स्यरूपिणी ततोदेव्याज्ञांगृहीत्वा घटस्थी
पात्रयोर्मध्ये पात्राणिस्थापयेद्यथा घटसमीपेगु
रुपात्रंततोभोगपात्रं ततःशक्तिपात्रं योगिनीपात्रं
वीरपात्रं बलिपात्रं पाद्याचमनीयपात्राणिस्वामाम्या
र्घ्यमन्त्रकमेणस्थापयेत् ततःशुद्धिसहितकारणे

ततस्तत्पुरुषाच्छ्रीगुरुपादुकां स्मरेत् तस्मात्स्वामस्तेनश्री
श्रुतकानन्दनाथगुरुपादुकां तर्पयामि नमः इति
त्रिः सकृद्वा मूर्द्धिनं संतर्प्य एवं परमगुरुपरापरगुरु
परमेष्ठिगुरून् अपि संतर्पयेत् ततः श्रीपादान्मूर्द्धि
श्रीस्वानन्दभैरवं तर्पयामि नमः इति मंत्रेण त्रिः स
तर्प्य ततो देवीं साङ्गां सवाहनां सपरिवारां हृदि सं
तर्पयेत् अथ तत्त्वशुद्धिः यथा स्वतंत्रे अङ्गुष्ठानामिका
योगाद्धा महत्त्वस्य पावेति तर्पयेत् कालिकां देवीं
साङ्गां सपरीकराम् अथ तत्त्वशुद्धिं कुर्यात् तदुक्तं
श्रुतौ ॐ प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्यो
तिरहं विरजा विपाप्मा भूयासं स्वाहा १ ॐ पृथिव्यप्
तेजो वाय्वाकाशानि मे शुध्यंतां ज्योतिरहं विरजा विपा
प्मा भूयासं स्वाहा २ ॐ प्रकृत्यहंकारबुद्धिमनःश्रो
त्राणि मे इत्यादि ३ ॐ त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे
इत्यादि ४ ॐ पाणिपादपायूपस्थशब्दा मे इत्यादि ५
ॐ स्पर्शरूपगन्धाकाशानि मे इत्यादि ६ ॐ वायुः तेजः
सलिलभूम्यात्मानो मे शुध्यंतां ज्योतिरहं विरजा विपा
प्मा भूयासं स्वाहा ७ इति सप्तऋग्भिर्विसर्गकार
णेन करतलं संमार्ज्य दक्षहस्ते त्रिकोणं लिखित्वा क
लापसंहारपीठशुद्धिं दक्षिणे वामभुवं संपुटं मध्ये इति

श्रा याय वामहस्तांगुष्ठमध्यमानामाभ्योगैरेकां गृहीत्वा
२ मस्त्रान्ते ह्रीं श्रीं आत्मतत्त्वेन स्थूलदेहं शोधयामि स्वा
२९ हा अनेनाधःस्थां शुद्धिं स्त्रीकृत्य ह्रीं श्रीं विद्यातत्त्वेन
सूक्ष्मदेहं शोधयामि स्वाहा अनेन दक्षिणस्थां स्त्री-
कृत्य ह्रीं श्रीं शिवतत्त्वेन परदेहं शोधयामि स्वाहा अ
नेनोत्तरस्थां स्त्रीकृत्य सर्वतत्त्वेन तत्त्वत्रयाश्रयं जीवं
शोधयामि स्वाहा अनेन वामदक्षिणमध्यस्थां स्त्री
कृत्य वक्त्रेण हस्तौ विशोध्य हस्ताभ्यां सर्वांगं मार्जये
दिति तत्त्वशुद्धिः मतमेतत्तु मन्त्रकृत तत्त्वानन्दतरंगि
णीमन्त्रमन्त्र्येयम् ततः श्रीपात्राद्विन्दुस्त्रीकारं अर्द्धे
ज्वलतीति त्रिभिः सर्वदेवतमन्त्रेण वा कृत्वा श्रीपात्राम
तेन पूजोपकरणाभ्युक्षणं सर्वत्र समयं भवेदिति
ततः सिंहासनस्य पूर्वदक्षिणपश्चिमोत्तरेषु त्रिको
णवृत्तं विलिख्य ऐं ह्रीं हूं माणिलाय नमः इति मण्ड
लान्तः पूर्वपूर्वं वा वटुकाय नमः इति गन्धादिभिरि
ष्ट्वा अर्घ्यपूर्णसलिलमांसमीनमुद्रासुधायुतं बलि-
मुपस्कृत्य बलिपात्रम् तेन वामांगुष्ठानामाभ्यां उत्स
जेदनेन एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभा
रभास्वरत्रिनेत्रज्वालामुख सर्वविघ्नान्नाशय नाशय
सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहा एवं बलि

वटुकाय नमः दक्षिणे योगिनीभ्यो नमः इति योगि
नीः समभ्यर्च्य दद्यान्नामाग्रहीभ्यां पूर्ववद्वलिमनेन
ॐ ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निस्तले
वा पाताले वा तले वा पवनसलिलयोर्यत्र कुत्र स्थि
ता वा क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपा
दिकेन प्रीता देव्यः सदा नः शुभबलिविधिना पान्तु वी
रेन्द्रवन्द्याः सर्वयोगिनीः हूं फट् स्वाहा एष बलिः
योगिनीभ्यो नमः पश्चिमे क्षां क्षेत्रपालमभ्यर्च्य
वाममुष्टिकृतदीर्घघातर्जन्या बलिं दद्यादनेन क्षां
क्षीं क्षूं क्षैं क्षौं क्षः क्षेत्रपाल धूपदीपसहितं बलिं गृ
ह्ण गृह्ण गृह्ण स्वाहा एष बलिः क्षेत्रपालाय नमः
उत्तरे गं गणेशमभ्यर्च्य दण्डाकारसंबद्धाङ्गुलीमध्य
वृद्धयोगेन बलिं दद्यात् गां गीं गूं गणपतये वर वरद
सर्वजनमे वशमानय स्वाहा एष बलिः गणपतये न
मः अथ स्ववामे पूर्ववन्मण्डलं कृत्वा पं ह्रीं व्यापक
मण्डलाय नमः इति संपूज्य तत्र साधारणबलिं सं
स्थाप्य मूलेनाभिमन्त्र्य गन्धपुष्पधूपदीपादिना तं सं
पूज्य ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः हूं फट् नमः
एष बलिः सर्वभूतेभ्यो नमः इति तत्त्वमुद्रया उत्सृजे
त् सशाकश्चेत् सर्वभूताय बलिमेकं दद्यात् ततः पू

पूजा हेवस्वंरंगमासंकृत्वाकामकलांविभाव्यतत्क्षणादि
२ वाकराकृष्णकुसुमांजलींकूर्म्ममुद्रयाहृत्वामूला
३: धारात्कुंडलिनींब्रह्मपथेपरशिवांतंध्यात्वाहृद
30 याष्टदलपीठेसमानीयमूलेनमूर्त्तिंकल्पयेत् तद
नंतरांतरे देवीसहस्रमार्गेणआनीयब्रह्मरंध्र
कम् वामनासापुटेध्यात्वानिर्म्मितंस्वांजलिस्थितम्
पुष्पमारोप्यतस्मिन्प्रतिमादौनिधापयेत् भैरवंतत्रै
व ततःश्रृंबीजरूपांतांध्यायेद्देवहृद्दक्षिणाम् योगि
नीचक्रसहितांमहाकालसमन्विताम् कालीतंत्रेऽपि
ततोहृदयपद्मांतःस्फुरंतीपरमांकलाम् यंत्रम
ध्येसमावाह्यमासजालेप्रविन्यसेत् कुमारीकल्पेऽ
पि ततोहृदयपद्मांतःस्फुरंतीविद्युताकृतिम् सह
स्रावर्त्मनानीत्वाशिरःस्थानेमहेश्वरीम् ततोवैहृद
यामन्त्रेपुष्पांतरेसमाहूयेत् नासयावामहादेवि
वायुबीजेनमंत्रवित् देवेशीतिचमंत्रेणबिन्दुनावा
ह्येत्सुधीः अथपूर्वबीजरूपंध्यात्वादीपाद्दीपांतरं
मितिच परशिवेसंयोज्यद्यमिति वायुबीजमुच्चर
न् वामनासापुटपथेनदेवींकुसुमांजलावानीय
मंत्रमध्येसमावाहयेत् अनेनमंत्रेण देवेशिशक्ति
सकलेपरिवारसमन्विते यावत्त्वांपूजयिष्यामिता

वंत्वमस्थिराभव २ इतिपंचमुद्रयेदेवीसमावाह्यमह
कालसहितश्रीदक्षिणकालिके इहागच्छ इहागच्छ
इहतिष्ठ इहतिष्ठ इहसन्निहिताभव इहसन्निरुद्धभव
ममपूजांगृहाणइसमावाह्यपुष्पांजलीवमांसंलेलिहा
मुद्रयाकुशाविष्टरेणवाकृत्वाफं इसवगुंठ्यधेनुयोनस
केलीकृत्यपरमीकरणंकृत्वा छोटिकाभिर्दशदि
ग्बंधनंविधायामृतीकरणंकृत्वांजलिर्देवींनामसं
बोधनाते ॐस्वागतंकुशलमिदमासनमिहास्यता
मितिवदेत अथवाहनादिमुद्रायथा दक्षिणामूर्ति
संहितायाम् उर्द्धांजलमधःकुर्य्यादियमावाहनीभ
वेत इयंतुविपरीतास्यात्तदावस्थापनीभवेत उ
ह्नीगोलामुष्टियोगतदेयसन्निधापनी अंतरांगुष्ठयु
गलंतदेयंसन्निरोधनी अथलेलिहामुद्रायथा त
र्जनीमध्यमानामासमंकुर्य्याद्धोमुखम अनामा
यांक्षिपेद्वत्वामूद्रकृत्वाकनिष्ठिकाम लेलिहानाम
मुद्रेयंजीवन्यासेप्रकीर्त्तिता अंजलिंवाद्धिवत्कृत्वा
परमीकरणंभवेत ततःखेचरमुद्रयावराभययोनीर्द:
र्शयित्वाप्रतिचक्रेषुमिहन्द्देवतामावाहयेत तदु
क्तंतंत्रे ध्यानाद्देवीसमावाह्ययोनिमुद्रांप्रदर्शयेत
ततःप्रतिचक्रेषुदेवीमावाहयेत्सदा अथखेचर्यादि

पुण मुद्रा यथा कनिष्ठानामिके बद्धांगुष्ठेनैव बद्ध्वा ततः
२ शेषांगुलीस्तु प्रसृते संश्लिष्टे वज्रमुद्रिका अंतरांगुष्ठ
३ मुष्टिं बद्ध्वा वामकरस्यैव मध्यमायां दक्षिणस्य
तथा लंबयेत् ततः मध्यमेनाथ तर्जन्यामांगुष्ठाभ्यां
विमृष्यैव दक्षिणां योजयेमार्गिं वाममुष्टौ च साधकः
दर्शयेद्दक्षिणे भागे मुण्डमुद्रेयमुच्यते वरदाभयमु-
द्रा च वरदाभयवत्कुरु तर्जनीमनामिके मध्ये कनिष्ठा
दिक्रमेण तु करयोर्योजयित्वैव कनिष्ठामूलदेशतः
अंगुष्ठाग्रं तु निःक्षिप्य महायोनिःप्रकीर्तिता अथ
रश्मिमण्डलदेवता यथा कालिकोपनिषदि ॐ काली
कपालिनी कुल्ला कुरुकुल्ला विरोधिनी विप्रचित्ता
उग्रा उग्रप्रभा दीप्ता नीला घना बलाका च मात्रा मुद्रा
मिता चैव दशा पंचकोणगा इति आसां ध्यानम्
यथा कालीतंत्रे सर्वाः श्यामा असिकरा मुण्डमाला
विभूषणाः तर्जनीं वामहस्तेन धारयन्त्यः शुचिस्मिताः
इति पूर्वादि पंचदशकोणे ध्यात्वा वाहयेत् तदष्टफे
त्कारिणाम् ततः पूर्वादिकोणेषु वामावर्त्तेन विम
सेत् ततः पूर्वाद्यष्टदले ब्राह्म्यादिकं ध्यात्वावाहयेत्
तद्यथा कुलसंभावे महेशिमण्डलं तस्यापि ब्राह्मी नारा
यणी तथा माहेश्वरी च वाराही कौमारी चापराजिता

वाराही च तथा पूज्या नारसिंही तथैव च आसां ध्यानं।
यथा ब्रह्माणीं हंससंयुक्तां स्वर्णवर्णां चतुर्भुजाम्
चतुर्वक्त्रां त्रिनेत्रां च ब्रह्मसूत्रं च पंकजम् दण्डपद्मा
क्षसूत्रं च दधतीं चारुहासिनीम् जटाजूटधरां देवीं
भावयेत्साधकोत्तमः नारायणीं महादीप्तां कृष्णां
गरुडवाहिनीम् नानालंकारसंयुक्तां चारुकेशां च
तुर्भुजाम् घण्टां शंखं कपालं च चक्रं सन्दधतीं पराम्
मधुमत्तमदोल्लोलदृष्टिं सर्वांगसुन्दरीम् माहेश्वरी
वृषारूढां शुभ्रां त्रिनयनान्विताम् कपालं डमरुं चै
व वरदाभयशूलकम् टंकं च दधतीं देवीं नानाभर
णभूषिताम् चामुण्डां महाहासां प्रकटितदशनां
भीमवक्त्रां त्रिनेत्राम् नीलाम्भोजप्रभाभां प्रमुदित
वपुषां नरमुण्डालिमालाम् खड्गं शूलं कपालं नर
शिरघटितं खेटकं धारयन्तीम् प्रेतारूढां प्रमत्तां
मधुमदमुदितां भावयेद्घोररूपाम् कौमारीं कुंकुम
प्रभां त्रिनेत्रां शिखिविसंस्थिताम् चतुर्भुजां शक्तिप
पाशांकुशाभयधारिणीम् नानालंकारसंयुक्तां श्य
मत्तां परिचिन्तयेत् अपराजितां च पीतां मत्तसूत्रव
रप्रदाम् कपालं मातुलिंगं च दधतीं परिचिन्तयेत्
वाराहीं धूम्रवर्णां च वराहवदनां शुभाम् फलकं खड्ग

पुण
२
३२
३४

अथवं लं हलं वेदभुजैर्युताम् नारसिंही न सिंहस्य विग्र
तीमहेशावपुः अथ कामपूर्वादिक्नत्वमाविशे
षवचनात् यत्र वेहृदयः किंवा पूजापूजकयोरंत
रा इति आगमे सर्वदेवतपूजने पूजापूजकयोरंतर
पश्चपूर्वादिक् तदुक्तं राघवभट्टेन यत्रैव भागस्तत्रवि
यमुद्देतिसा चौतितानेवदविदो वदंति अथांतरापूजा
कपूजयोश्च सदागमज्ञाः प्रवदंतितांत अन्यच्च देव
साधकयोरंतः पूर्वाशादिगिहोच्यते अपिच पूजापू
जकयोरंतः पूर्वाशैवनिगद्यते तदंतरेऽपि होतः
पूर्वं पूर्वभागं प्रदिष्टं मध्यभागं दक्षिणस्यागनेः
दत्तविस्यादुत्तरंभागमग्रप्रज्ञाविद्भिः पश्चिमभाग
मुक्तम् अन्यमितिसंभावमितिसर्थः यत्र पुरंदर
मुखो मंत्री पूजयेत् त्रिपुरां यदि देवी पश्चान्मदा प्राचीप्र
तीचीत्रिपुरेश्वरः इति गमार्णववचनम् नत्रिपुरा
विषयेवोक्त्यम् देवीमात्रविषयकल्पनेमालाभवे
त अथमूलमंत्रांते श्रीमहाकालसहितां श्रीदक्षि
णकालिकां तर्पयामीति त्रिःसंतर्प्य माड्यांसप
रिवारां चतर्पयेत् ततोऽष्टादशोपचारैः षोडशोप
चारैर्दशोपचारैः पंचोपचारैर्वा देवीं पूजयेत् तदु
क्तं स्वतंत्रे आवाहयेन्मतिदलेमलदेवीं चतर्पयेत् त

पियेत्कालिकांदेवींसायुधांसपरीकराम् पाद्यादि।
भिर्म्मूलदेवींसंपूज्यतर्प्पयेत्पुनः अथोपचारायथा
तन्त्रेफेत्कारिणाम् आसनावाहनेचार्घ्यंपाद्यमा
चमनंतथा स्नानंवासोपवीतंचभूषणानिचसर्व
शः गन्धपुष्पंतथाधूपदीपावन्नंचतर्प्पणम् माल्या
नुलेपनेचैवनमस्कारविसर्जने अष्टादशोपचारै
स्तुमंत्रीपूजांसमाचरेत् मंत्ररत्नावल्यांतु पाद्या
र्घाचमनीयंचस्नानंवसनभूषणाम् गन्धपुष्पधू
पदीपनैवेद्याचमनंततः ताम्बूलमर्चनास्तोत्रंतर्प
णंचनमस्क्रिया प्रयोजयेदर्चनायामुपचारांस्तुषो
डशः आसनं अर्घ्यंपाद्यंनिवेद्याथतथैवाचमनीय
कम् मधुपर्काचमनंचैवतथागन्धप्रसूनके धूप
दीपौचनैवेद्यंदशोपचारकंस्मृतम् गन्धादिका।
नैवेद्यान्तापूजापंचोपचारिका अथपूजायांनिषे
धोयथा कालीकल्पे श्रीपदंपूर्वमहृत्पादुकाप।
दमुद्धरेत् पूजयामिततःपश्चात्पूजयेदंगदेवताः
कालादयःपूजनीयाःक्रमेणपरमेश्वरि स्वाहान्ते
मेतर्प्पणोचतर्प्पयामीतिसंस्मरेत् देवीदक्षिणे महा
कालंपूजयेद्यथा कुमारीकल्पे देव्यास्तुदक्षिणेभा
गेमहाकालंसमर्चयेत् कालीकल्पेऽपि महाकालं

पूजा यनेयत्नात्समस्तांदेवींप्रपूजयेत् अथमंत्रोयथा ॐ ह्रैं
२ यांरांलांवांक्रौंमहाकालभैरवसर्वविघ्नान्नाशय
३३ नाशयह्रींश्रींफट्स्वाहा अनेनपाद्यादिभिराराध्य
33 विलक्षयित्वामूलैर्देवींपूजयेत् यथामूलांतेच ततः
पाद्यंमहाकालसहितश्रीदक्षिणकालिकायैनमः
इतिपादयोःपाद्यंमहाकालसहित श्रीदक्षिणकालि
कायैनमइतिपादयोःपाद्यंदद्यात् केषांचिन्मतेतु
महाकालसहितपदसंवलितदेवीनामप्रयोगोन
भवतीतिसांप्रदायिकाः अथार्घ्यंशिरसिदद्यात् एवं
आचमनीयम् मधुपर्कंच वमिति वरुणबीजांते
शवपंकजेदद्यात् स्नानीयंनमइतिस्नानीयंदत्वा
शुष्कदुकूलेनांगंप्रोक्षणविचित्रपरवस्त्रकस्तूरीकुं
कुमचन्दनसिन्दूरकज्वलमुकुटकुण्डलताडंकहार
त्रयशंखकंकणमुद्रग्रीवाभूषणकांचीनूपुरसन्तो
ग्रीवकाद्याभरणानिविविधपुष्पादिरचितमाल्या
दीनिनिवेद्यकेवलेपुनराचमनीयंदद्यात् तदुक्तम्
पाद्यंचपादयोर्दद्यात्नासांतेनवमंत्रवित् शिरोमं
त्रेणदेवशिरस्यर्घंदद्याच्छिवोपरि आचमनंमधुप
र्कंचस्वधायामंत्रेणदेशिकः स्नानंगन्धहृदादद्यात्स्वा
हाणांवौषडिमपि ततोनिवेदयामीतिदद्यात्सर्वम

देश्वरि स्वधां मंत्रेणा वरुणा मंत्रेण इत्यर्थः स्वधेत्याच
मनीयं च विवार्त्तं मुखे पंकजे तेनांतरे च नमः स्वा
हा स्वधा चैव वौषडिति यथाक्रमम् स्वाहामन्त्रि
तिपाठाच्च आचमनीयं स्वधेति वकारमध्यपा
ठो युक्त एव भवति तन्न समीचीनं ग्रन्थागमे प्रायः
सर्वकेतैनैव मंत्रोद्धारः क्रियते एकमंत्रोद्धारेऽपि कु
त्रापि तत्तद्वर्णेन कुत्रापि पर्यायशब्देनापि तत्त
न्मंत्रोद्धारो दृष्टः इति उकारमध्यपाठो युक्तः तत्र व
कारमध्याः अन्यथा राघवभट्टोक्तवचनविरोधा
पत्तेः तद्यथा मधुपर्कं मुखे दद्यात् जलमंत्रेण दे
शिकः किंच वारुणेन तु मंत्रेण मधुपर्कं मुखा
बुज इति नच वाच्यं मधुपर्कविषयमेवेदं वचन
मिति मधुपर्काचमनयोरेकमंत्रेण दानात् स्वधे
तिपाठो युक्तः एवेति निश्चितं ततो मध्यमानामिकां
गुष्ठान्यो नमः इति गन्धं अंगुष्ठतर्जनीभ्यां पुष्पाणि
वौषडिति पुष्पैः संपूज्य साहतं स्वधर्मकृत्स्नमादि
के च वौषडिति मंत्रेण दत्वा धूपपात्रे फडिति संप्रो
क्षण नमः इति इष्टाग्रतो निधाय वामतर्जन्या संस्पृश
न धूपं निवेदयामीति श्रीपात्रामृतेनोत्सृज्य गजघ
ति मंत्रमातः स्वाहेति घंटां संपूज्य वामहस्तेन तां वादः

पूजा यत् मध्यमानामिकांगुष्ठैः पुष्पं दत्वा देवतायायै श्रीमू-
२ लमंत्रेच जलमात्रिधोत्तोलनं कृत्वा देवीं धूपयेत् अथ
३४ संपुटिदीपभाजनं संस्थाप्य पूर्ववत् प्रोक्षणपूजने
34 कृत्वा वाममध्यमया दीपपात्रं स्पृशन् दीपं निवेद-
यामीति निवेद्य घंटां पूर्ववत् वादयन् मध्यमाना-
मिकामध्ये दीपपात्रं संगुष्ठाग्रेण धृत्वा दर्शयेत् ततो
मधुद्रव्यं संपुटि कृत्वा ॐ कालि कालि महाकालि
क्रूं ह्रूं अमृतमासवम् विधिवत्कुरु कुरु स्वाहा इति
मंत्रेणामृतमयाभिमंत्र्य च ग्रासमुद्रया पात्रमादाय
दक्षिणपाणिनांगुष्ठादिकं गृहीत्वा कराभ्यां संयोज्य
मूलमंत्रान्ते शुद्ध्यादिसहितमासवं निवेदयामीति।
दद्यात् ततो नैवेद्यं स्वर्णादिपात्रे कृत्वा त्रिकोणमंड-
लोपरि धृत्वा ततः संस्थाप्य हूंमित्यवगुंठयमिति वा
युवीजेन संशोध्य रमिति वह्निवीजेन संदह्य वमिति
वरुणवीजेनायेन्नमृतयामृतीकृत्य तदुपरि मूलं
समष्टधा प्रजप्य वामांगुष्ठेन नैवेद्यपात्रं स्पृशन् नैवे-
द्यं निवेदयामीति दक्षिणहस्तेन तत्त्वमुद्रयोत्सृजेत्
ततो जलगण्डूषं दत्वा प्राणादिपंचमुद्रां प्रदर्शयन् वा-
महस्ते ग्रासमुद्रां प्रदर्शयेत् ततः पुनराचमनीयं द-
त्वा कर्पूरादियुक्तं ताम्बूलं वामांगुष्ठेन धृत्वा ताम्बूलं

निवेदयामीति दद्यात् सर्वमर्घ्यजलेनोत्सृजेत् तः
ततस्तन्मुद्रयार्घ्यामृतेन देवीं त्रिः संतर्प्य योनिमु
द्रां दर्शयेत् तदुक्तं तंत्रांतरे मध्यमानामिकाभ्यां तु
अंगुष्ठाग्रेण पार्वति दद्यात् विमलं गन्धं मूलमंत्रेण
देशिकः अंगुष्ठतर्जनीभ्यां तु वक्रे पुष्पं निवेदयेत्
यथा गन्धं तथा देवी धूपं दद्याद्विचक्षणः मध्यमाना
मिकाभ्यां तु मध्यपर्वणि देशिकः अंगुष्ठाग्रेण देवे
शि दत्वा दीपं निवेदयेत् उत्तोलनं त्रिधा कृत्वा गाय
त्र्या मूलयोगतः ततस्तन्मुद्रया देवि नैवेद्यं च निवेद
येत् मूलेनाचमनं तांबूलं तेन मुद्रया तेन तत्त्वेसा
मान्यविशेषणार्थः सारदाटीकायां च धूपभाजनं
मंत्रेण प्रोक्ष्य संपूज्य हृदात्मना अस्त्रेण पूजितां घंटां
वादयन् गुग्गुलं दहेत् अन्यत्रापि गजध्वनिं ततो मंत्रमा
तः स्वाहेत्युदीर्यैव अभ्यर्च्य वादयन्घंटां सधूपे धूप
येत्ततः तंत्रांतरे च ततः समर्पयेत् धूपं घंटावाद्यय
जस्वनैरिति एवं दीपदाने घंटावादनमिति सांप्रदा
यिकाः अथ गन्धादिनिवेदनस्थानम् यथा यामले
निवेदयेत्स्वरो भागे गन्धं पुष्पं च भूषणम् दीपं दक्षि
णतो दद्यात् पुरस्से न तु वामतः वामतस्तु तथा धूपम
ग्रे वा न तु दक्षिणे नैवेद्यं दक्षिणे चापि पुरतो न तु पृष्ठ

श्या तः दीपमिति घृतयुक्तं चेतद्दक्षिणे तैलयुक्तं वे वामे इति
२ सांप्रदायिकाः पंचसितावर्त्तिश्चैव दक्षिणे ततः रक्तावहु
२९ मतः संख्याविहीन नियमः नैवेद्यमिति सिद्धान्नं चेतद्देव
तावामे आमान्नं चे दक्षिणे इत्यपि वा तु मम् अथ पुष्प
नियमो यथा मुण्डमालायाम् पुष्पाण्यपि तथा दद्या
त् रक्तकुसुमसितानि च श्वेतं रक्तं जवापुष्पं करवीरं त
था प्रिये दोणं मल्लिका जाती मालती यूथिका तथा
शुक्लराशोकबकुले श्वेतकृष्णापराजिता वकपु
ष्पं बिल्वपत्रं चंपकं नागकेशरम् मल्लिका किंटि
काकाची रक्तयत्परिकीर्त्तितम् अर्कपुष्पं जवापु
ष्पं बर्बरं च प्रियं भवेत् अष्टम्यां च विशेषेण तुष्टा भव
ति पार्वती पद्मपुष्पेण रक्तेण संतुष्टाः सर्वदेवताः
कृष्णं वा यदि वा रक्तं कालिका वरदा भवेत् श्मशान
धुस्तूरेणैव तुष्टा धूमावती परा अमपुष्पैश्च विवि
धैः संतुष्टा देवि पार्वति आमलक्यास्तु पत्रेण तुष्टा
भवति पार्वती अष्टम्यां च चतुर्दश्यां नाना पुष्पैः सम
र्चयेत् श्मशाने रात्रिशेषे वा शनिभौमदिने तथा म
न्त्रसूक्ते स्वगाद्यैश्वेतलोहितमक्तहेमरवियदलैः
बिल्वैर्भिरुवकाद्यैश्च तुलसीवर्जितैः शुभैः उत्तपुष्पै
विशेषेण वत्र पुष्पाणि मिश्रितम् सर्वपुष्पप्रदानतश्च

भक्तियुक्तेन चेतसा देवानामिष्टपल्लवाणां देवीनामि
तिवोद्धृतम् तदुक्तं तन्त्रान्तरे देवीपूजा सदा कार्य्या न
लैनैः स्थलजैरपि विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन
चेतसा पूजनीया सदा भक्त्यान्तरेणाशीघ्रफलाप्तये अ
थपुष्पदानविधानम् यथा तदुक्तं सारदाकीकायां
पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम् दुःखदं तत्स
माख्यातं यथोत्पन्नं तथार्पणम् अधोमुखं फलं नेष्ट
पुष्पाञ्जलिविधौ न तत् अथ नैवेद्यं यथा तदुक्तम
न्यसूक्ते पायसं कृशरं दद्यात् शर्करागुडसंयुक्तम्
गव्यमुद्गमधुपयस्तथान्यानि निवेदयेत् शालमत्स्य
वपादीनि गोधामांसमनुत्तमम् अन्नेन च मधुना युक्तं
यत्नाद्दद्याच्च मन्त्रवित् कृशरं तिलतण्डुलमिश्रं:
पाठीनं वा दालमिश्रितः अन्यत्रापि कन्दर्पकेस्नेहप
केघृतसंयुक्तपायसम् मम प्रियं च नैवेद्यं दद्याद्देव्यै
पुनः पुनः कन्दर्पकं भ्रष्टतण्डुलपृथुकादिकम् स्नेहप
केलड्डुकादि कुमारीकल्पेऽपि ताम्बूलं वसकर्पूरं ना
रिकेलं सशर्करम् पायसं सघृतं चैव आर्द्रकं सगुडं त
था सतण्डुलं तिलं चैव दधि चैव सशर्करम् नवीरप
नसं चैव आम्रातकं फलं तथा कदलीतिन्तिडीं चैव श्री
फलं फलमनुत्तमम् करंजं वकुलं चैव तालं खर्जूरमेव

पूजा च अन्नानि च सुगन्धीनि स्वादूनि च फलानि च गुडा
२ मालायामपि दधिक्षीरं गुडं चान्नं पायसं सशर्करान्वितं
३८ पायसं क्षौद्रमांसं च नारिकेलं समोदकम् शाकं मे
षकं चैव आर्द्रकं च सशर्करम् शालमत्स्यं च पाठी
नं शकुलं गुडकं तथा मद्गुरं चेलिषं छागमांसं माहि
षमेव च पक्षिमांसं वाराहं हरिणं नानासमुद्भवम् कु
लच्छागं महामांसं गोधिकां हरिणीं तथा जलजं म
त्स्यमांसं च गण्डकीमांसमेव च नानाव्यञ्जनयुक्तानि
व्यंजनानि बहूनि च नैवेद्यपात्रं यथा यामले तैजसे
षु च पात्रेषु सौवर्णे राजते तथा ताम्रे वाश्मरे वापि प
त्रपात्रेऽथवा पुनः यज्ञदारुमये वापि नैवेद्यं कल्पयेद्बु
धः सर्व्वाभावतमाहेषि स्वहस्तघटितं यदि यथायोग्यमर्घ्य
पात्रे तत्तद्विधाय निवेदयेत् अन्यैस्तोयैर्यदुत्सृष्टमर्घ्य
पात्रस्थितैस्तैः न गृह्णाति महादेवी दत्तं विविधशतैरपि
अर्घ्यपात्रभेदस्तु मत्कृतश्रीतत्त्वचिंतामणावनुसन्धे
यः अथ कृताञ्जलिः श्रीदक्षिणकालिके आवरणं ते
पूजयामीति आज्ञां गृहीत्वा अग्नीशासुरवायव्यमध्ये
दिक्षु च देव्याः षडङ्गं वा षडङ्गदेवतां ध्यात्वा मामासोऽहं मंत्रे
ण यजेत् तदुक्तं कुलार्णवे अग्नीशासुरवायव्यमध्य
दिक्ष्वङ्गपूजनम् इति तन्त्रान्तरे च हृदयमारभ्य

मेशामंतुशिरोयजेत नेत्रेमांचशिखायोहजावाय
मांकवचंयजेत अस्मद्धीणुरतोनिसदिक्षुवास्वम
यांत्र्वयेत अपिच वस्नादिदिक्षुवासूमात तदंगोद्भव
क्रमात ध्यानंयच्या तयाःस्फटिकश्यामनीलरक्ता
स्वरूपाश्चिषः वरदाभयधारिण्यः प्रधानंतनवांछिषः
अथगुरुपंक्तित्रयंपूजयेत तदुक्तंसारदादीकायां
वायव्यादीशपर्यंतंगुरुपंक्तिंसमर्चयेत तदशक्तौ
गुरुचतुष्टय तदशक्तौगुरुत्रयम् तदेवतत्रविमा
श्चेवा अथगुरुपंक्तिर्यथा तदुक्तंभावचूडामणौ श्री
भैरवउवाच मातर्देविमहामायेवक्ष्यमोहप्रवर्त्ति
नि रदांनीश्रोतुमिच्छामिगुरुक्रममनुत्तमम् श्रीदे
व्युवाच गुरुक्रमस्तुवक्तव्यायामत्रविस्तारगौरवात का
लीनाथमनादित्वात्तत्कथंकथयामिते नत्वात्वागुरु
रूलंदेवनष्टमार्गोभविष्यति नष्टमार्गोनात्रविद्येन्
तादृक्फलगोचरम् गुरूणांशिष्यभूतानांनास्तिचेत्स
ततिक्रमः मंत्रतंत्राश्चविद्याश्चनिष्फलानात्रसंशयः
विंशतिपुरुषान्व्यापिनवस्तमत्रयोऽपिवा अत्रात्वागु
रुवंशानांशिष्यस्तनष्टसंततिः सर्वंशांदधिकंहेया
गुरुवंशंमहाशुभम् जनकादधिकोहेयोमंत्रदस्त्व
महेश्वर तस्मात्सर्वत्रदेवेशसंसेव्यानष्टाननान्यरूपन

पूणा २ १२ 37

आदौसर्वत्रदेवेशांमंत्रदःपरमोगुरुः परापरगुरुस्त्वं
हिपरमेष्ठिरहंततः सर्वतंत्रेषुविद्यासुस्वयंप्रकृति
रूपिणी ततःपुरुषरूपश्चततःस्वगुरुसंततिः तेनैव
हिसदेशाश्चसमुद्रत्याश्चविशेषतः शैवमंत्रेषुपरतः
सर्वत्रसिद्धिदायकः दिव्यौघागुरवोदेवसिद्धौघागु
रवस्तथा मानवौघाःसमासेनकथयामितवाग्रतः
तत्रादौकालिकादेवीतस्याःशृणुगुरुक्रमम् महादे
वीमहादेवस्त्रिपुराचैवभैरवः दिव्यौघाःगुरवःप्रो
क्ताःसिद्धौघाकथयामिते ब्रह्मानन्दःपूर्णदेवश्च
लचित्तश्चलोचनः कुमारःक्रोधनश्चैववरदःस्मर
दीपनः मायामायावतीचैवमानवौघान्शृणुप्रिये
विमलःकुशलश्चैवभीमःसूर्यःसुधाकरः मीनोगोर
क्षकश्चैवभोजदेवःप्रजापतिः मूलदेवोरंतिदेवोवि
घ्नेश्वरहुताशनौ समयानन्दसंतोषौकालिकागु
रवःस्मृताः अथदेवीप्रतिभैरववाक्यम् तदुक्तंतंत्रा
र्णवे दिव्यावसंतियेनिंत्यंसिद्धभूमाविहायिच मा
नवौघामानवेष्वमनूपधराःसदा आनन्दनाथः
शब्दांतागुरवःसर्वसिद्धिदाः स्त्रियोःपितृरूपाश्च
श्चांताःपरिकीर्तिताः मानवौघातिकेदेविस्वगु
रुंपरित्यजेयत् अथवाप्रातःक्रमेषुयत्सामामागुरु

कुलशुक्रं तदेवार्द्धयेत तद्यथा भावचूडामणौ अथवा
सर्वेषां श्रेष्ठगुरवः पूर्वसूचिताः कुलचूडामणौ एक
चित्तमनाभूत्वा श्रृणु वत्स समाहितः येषु येषु च संते·
षुयेयेऋषिगणाः स्मृताः तेते पूज्याः सपर्य्यादौ संप्रदे
पाइति तद्यथा श्रुत्वा त्वा गुरुकुलं वा गुरुश्चितयमर्द्व
येत वत्स पूर्ववामंकोलानवकार्य्यस्ततः परम गुरुः
परमगुरुश्चैव परापरगुरुस्तथा परमेष्ठिगुरुश्चैवक
थितात्गुरवस्तथा गुरुपूजां विना वत्स यदि पूजां सं·
माचरेत् तदोषसमायेवत्स कुलपूजां समाचरेत् वि
गुणं यत्र यद्यत्स्यात्तद्गुणं कुलपूजनम् कुलावलो
कनेचैतस्मात्कनः प्रोक्षणमार्जनम् कवचस्थानेकका
शुद्धिः कवचमासविशोधनम् दीक्षाश्रभुः कुलीनस्था
कुलात्मावटुकेश्वरः तद्गेहे गुरुमानीय कुलरूपं
रूस्मरेत् कुलयथा गुरुस्तत्वमविज्ञेयो न तथा कु
लसाधकः गुरुक्रमं च कथितं गोपनीयं प्रयत्नतः
नदेयं यत्र कुत्रापि योगभ्रष्टचतुष्के पशोरग्रेण वै
वैषानामयुतं कुलेश्वरः वैस्नवशक्तितत्रेवागणाप
सेः थवापुनः निजगुरुं परोत्थ्याखात्वाततोगुरुचतुष्ट
यम् पूजयित्वा यजेद्देवं न च संकोचमाचरेत् श्रीम
हादेवं वा श्रीपादुकां पूजयामि नमः इति संपूज्य गु·

श्या रुपात्रामृतेन त्रिः सकृद्वा तर्पयेत् एवं महादेवानन्दनाथ
२ गुरुपादुकां पूजयामि नमः इति संपूज्य पूर्ववत्पूजयेत
२८ तर्पयेत् एवं क्रमेण गुरुपंक्तित्रयं संपूज्य मानवौघान
38 स्वगुरुगुरोर्गुरुस्तद्गुरुरूपत्रयं पूजयेत् तर्पयेच्च ततोऽ
भिष्टदेवताः पूजयेद्यथा वाह्यत्रिकोणस्य संमुखे
ॐ कालीश्रीपादुकां पूजयामि नमः इति पाद्यादिभिः
संपूज्य योगिनीपात्रामृतेन तत्त्वमुद्रया तर्पयेत् एवं
देव्या वामे ॐ कपालिनी दक्षे ॐ कुल्या तदन्तस्त्रिकोणे
ॐ कुरुकुल्ला ॐ विरोधिनी ॐ विप्रचित्ता तदन्त
स्त्रिकोणे ॐ उग्रा ॐ उग्रप्रभा ॐ दीप्ता तदन्तस्त्रिको
णे ॐ मात्रा ॐ मुद्रा ॐ मिता पाद्यादिना त्रिः संपू
ज्य पूर्ववत्तर्पयेत् ततोऽष्टदलपद्मे पूर्वादिक्रमेण
ष्टशक्तीः पूजयेत् यथा ॐ ब्राह्माणी श्रीपादु
कां पूजयामि नमः इति पाद्यादिभिः संपूज्य तर्पयेत्
अग्नौ ॐ नारायणी दक्षिणे ॐ माहेश्वरी नैर्ऋते
ॐ चामुण्डा वारुणे ॐ कौमारी वायौ ॐ
अपराजिता उत्तरे ॐ ॐ वाराही ईशे ग्रसः नारसि
ही पूर्ववत्संपूज्य तर्पयेच्च ततः कुसुतो द्वितीयवा
रः षष्ठाष्टादशद्वादशावर्तदशषोडशाक्षरभेदेन
प्रथममेव प्रणवेनावाहनं चैतेनैव पूजनं विदुः

कुमारीकल्पेऽपि बालायाः पूजयेदस्मै त्रैपञ्चाग्रे भैरवा
न्पूजयेत् लोकपालांस्तथावासितदस्त्राणि च तद्बहिः
अथ भैरवान् यथा ज्ञानार्णवे असितांगो रुरुश्चण्डः
क्रोधश्चोन्मत्तभैरवः कपाली भीषणश्चैव संहारश्चा
ष्टमः स्मृतः एषां मन्त्रो यथा ज्ञानार्णविन्दुसंयुक्ता वा
ऽऽद्याद्याश्चैव भूषिता इति अत्र प्रयोगः पूर्वादिवामाव
र्त्तेन ऐं ह्रीं अं असितांगभैरवश्रीपादुकां पूजयामि नमः
ऐं ह्रीं इं रुरुभैरव ऐं ह्रीं उं चण्डभैरव ऐं ह्रीं ऋं क्रोधभै
रव ऐं ह्रीं लृं उन्मत्तभैरव ऐं ह्रीं एं कपालिभैरव ऐं ह्रीं
ओं भीषणभैरव ऐं ह्रीं अं संहारभैरव पूजयेत्तर्पयेच्च
ततो भूपुरे इन्द्रादिलोकपालान्पूजयेत् यथा पूर्वादि
तः लां इन्द्रश्रीपादुकां एवं रां वह्नि यां यम क्षां निर्ऋति
वां वरुण यां वायु शां कुबेर हां ईशान निर्ऋतिवरुणयो
र्मध्ये ह्रीं अनंत इन्द्रेशानयोर्मध्ये आं ब्रह्मणः श्रीपादु
कामित्यादि तद्बहिः तदस्त्राणि पूजयेत्तर्पयेच्च यथा
वं वज्रश्रीपादुकां एवं शं शक्ति दं दण्ड खं खड्ग पां पा
श अं अंकुश गं गदा त्रिं त्रिशूल पं पद्म चं चक्र श्रीपादुका
मित्यादि अथैवं क्रमेण सर्वावृत्तिदेवतानुलेपनगंध
पुष्पधूपदीपनैवेद्यादिभिः संपूज्य त्रिः सकृद्वा पूजयेत्
तर्पयेच्च तदुक्तं कुलार्णवे त्रिवारं तर्पयेद्वापि सकृद्वापि

पुपा यथेच्छया कालीतंत्रे सर्वासामपि दातव्यो बलिः पूजा
र तथैव च अनुलेपनकं गंधधूपदीपोपचारकः त्रिसि
३९ पूजा प्रकर्तव्या सर्वासामपि साधकैः अत एव सर्वासा
39 वलीनां शक्तीनां पूजने त्रिवारमवश्यमेव दर्शितम् त
तो देव्या अस्त्रं पूजयेद्यथा देवीवामोर्द्ध्वहस्ते खङ्गं अ
धोमुण्डं दक्षोर्द्ध्वे अभयं अधो वरं पूजयेत्तर्पयेच्च
ततः षडंगं विन्यस्य पूर्ववद्देवीं ध्यात्वा गन्धपुष्पादीन्ता
कृष्णधूपदीपं दत्वा पूर्ववद्घण्टां वादयन्धूपदीपं द
र्शयेत् ततः पानीयादिकं दत्वा पूर्ववन्नैवेद्यादिकं
निवेद्य विसर्जयेत् योन्यादिमुद्रां दर्शयेत् ततः पुष्पा
ञ्जलित्रयेण पंचभिर्वा देवीमायुधसपरिवारमहाका
लसहितश्रीपादुकां पूजयामि नमः इति सम्पूज्य विसर्ज
येदिति कालीतंत्रेऽपि एवं पूजां पुराकृत्वा मूलेनैव
यथाविधिः नैवेद्यादीन्यथाशक्त्या दद्याद्देव्यै पुनः पुनः
ततो वेदशवारं तु दीपं दत्वा च साधकः पुष्पादिकं पु
नर्दद्यान्मूलेनैव यथाविधिः कुमारीकल्पेऽपि ततो
नीराजनं कुर्यात् दशवारं प्रदीपकैः अस्यार्थः आ
रात्रिकविधिना दीपान्प्रज्वाल्य देवतामस्तकान्तं नी
त्वा परिभ्राम्य नीराजनं कुर्यादित्यं दशधा आरात्रिक
विधानं तु श्रीतत्त्वचिन्तामणावुक्तमस्त्येयम् अथ पंचमा

यैर्देवीं परितोषयेत् तदुक्तं पूजयित्वा महादेवीं सुरा
मांसमत्स्यादिभिः अन्यैर्नानाविधैर्देवि परितोष्य च पा
र्वतीम् अथ मुण्डमालातन्त्रे सुरादानप्रशंसा सुरा
दानेन देवेशि महायोगीश्वरो भवेत् सुरा तु त्रिविधा
देवि स्फाटिकी डाकिनी तथा कांजिकी स्फाटिकी
दानेन धनवृद्धिरनुत्तमा डाकिनीदानमात्रेण वैष्णवः सा
र्वो भवेद्ध्रुवम् कांजिकी सुरया देवि योऽर्चयेत् परमेश्व
रीम् तस्य कांजनस्तंभादिमारणोच्चाटनादिभिः महा
सिद्धीश्वरो भूत्वा वशीकस्यायुतं देवि अर्घ्ये दत्ते महेशा
नि महासिद्धिरनुत्तमा अथोत्तरे त्रिकोणमालिख्य मां
सतिलरक्तपुष्पमत्स्यमेकीकृत्य तत्र संस्थाप्य ॐ
ह्रीं श्रीं दक्षिणायै कालिकायै स्वाहा एष बलिर्नमः ॥
मत्स्यमांसे संस्थापयेत् तदुक्तम् पूजान्ते भोजनादौ
वा बलिं दद्यान्महेश्वरीम् इति बलिमुत्स्थाप्य नैवेद्यमै
शां दिशि धारयेत् ततः प्राणायामादिकं कृत्वा काम
कलां विभाव्य शिरसि गुरुं ध्यात्वा हृदि देवीं भावयन् म
नसा अष्टोत्तरसहस्रं रहस्यमालया वर्णमालया करमा
लया वा प्रजप्य पुनः प्राणायामं विधायार्घ्यजलं पुष्पा
दिकं गृहीत्वा गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जप
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्त्वयि स्थिते इमनेन तेजो

पुणा मयंजपफलंदेव्यादक्षहस्तेसमर्पयेत् तदुक्तंकालीतं-
२ त्रे ततःस्ववहितोमंत्रीगुरुंनत्वाशिरःस्थितम् देवींध्या
४. त्वाष्टोत्तरसहस्रंप्रजपेन्मनुम् तेजोमयंजपफलंदे
40 व्याहस्तेसमर्पयेत् गुह्यातिगुह्यगोप्तात्वमितिमंत्रेण
मंत्रवित् अथरहस्यमालायथा तदुक्तंकालीतंत्रे द
न्तमालयादेविराजदंतेनमेरुणा प्रजपेदिमर्थः तस्य
द्वादशपटलेऽपि दंतेनकालिकायास्तुपूर्वोक्तास्तुवि
दुर्लभा इतिमुण्डमालायांच नारीभिर्ग्रथितामालाम
हासिद्धिप्रदाभवेत् तंत्रेचसर्वशाक्तैः नवांगुल्यास्थि
मालाचग्रथितापर्वभेदतः सर्वसिद्धिप्रदामोक्षदायि
नीवरवर्णिनि नारीसंग्रथनेकार्य्यरक्तेनवासमस्तापि
सदागोप्याप्रयत्नेनमातृस्वजारवत्प्रिये अथवर्णमा
लायथा विशुद्धेश्वरमहातंत्रे मालाविधानंपरमंश्रृ
णुपार्वतितत्त्वतः येनानुष्ठितमात्रेणमंत्राःसिद्ध्यन्ति।
तत्क्षणात् अनुलोमविलोमेनमंत्रमात्रविभेदतः
मंत्रेणांतरितंवर्णंवर्णेनांतरितंमनुम् कुर्याद्वर्णम
यींमालांसर्वमंत्रप्रदीपनीम् वर्माणंमेरुरूपंलंघ
येन्नकदाचन रहस्यमेतत्परमंमयोक्तंतवशाश्विति
त्वयागुप्ततरंकार्य्यंनाख्येयंयस्यकस्यचित् मंत्रांतरे
मुक्तंयामलेयथा सविन्दुवर्णगुच्छार्य्यपश्चात्मंत्रंजपे

न्त्रधीः स्वमेरुकं जल्पयित्वा जपेत् न्नातिलंघयेत् अ
ङ्गुलोमस्थकल्पयावर्णमालया जपेन्मेरुसमाश्रि
मंलंघनं तस्यनाचरेत् अष्टोत्तरजपादादौ वर्गाष्टकं
प्रयोजयेत् अकचटतपयशाइमयं चाष्टवर्गाः मुण्डमा
लायांच मेरुहीनाचयामालामेरुलंघ्याचयाभवेत्
अशुद्धातिप्रकाशाद्वा सामालानिष्फलाभवेत् अथा
करमालायथा तडकेष्टरहतश्रीक्रमे तर्ज्जमग्रेतथा
मध्येयोजपेत्सतुपापकृत् अनामायास्त्रयंपर्वका
निष्ठायास्त्रिपर्विकाम् मध्यमायास्त्रयंपर्वंतर्ज्जनीमू
लपर्वाणि जपेदित्यर्थः मुण्डमालायांच अङ्गुलि
जपंकुर्यात्साङ्गुष्ठाङ्गुलिभिर्जपेत् अङ्गुष्ठेनविनाक
र्मकृतंतदफलंभवेत् आरभ्यानामिकामध्यात्प्राद
क्षिण्यक्रमेणत तर्ज्जनीमूलपर्य्यंतंकरमालाविधी
यते मेरुंप्रदक्षिणीकुर्वन्नअनामामूलपर्वतः मेरु
लंघनदोषात्तु अन्यथाजायतेफलम् मध्यमात्रितया
याह्याअनामामूलमेवच अनामामध्यपर्व्वाञ्चमेरुं
कृत्वानलंघयेत् तर्ज्जन्यग्रेतथामध्येयोजपेत्सप्रमा
न्त्रः चत्वारितस्यनश्यंतिआयुर्विद्यायशोबलम् इस
पारमेश्वरेऽपि पर्वद्वयमनामायाः परिवर्त्तनवैक्रमात्
पर्वत्रयंमध्यमायास्तर्ज्जन्येकंसमाहरेत् शक्तिमाला

श्या समाख्यातासर्व्वतंत्रप्रदीपिका निसिजपंकरेत्कुर्य्यात्
र नतकाम्यकदाचन मुण्डमालातंत्रेच जपंनिसिकरे।
४१ कुर्य्यात्ननतकाम्यमबोधनात् अथक्रमोनिशायां।
41 करणीयः बलिपूजादिकंसर्व्वंनिशायांक्रियतेसदा
ततदत्वयतोयातिकालीविद्याप्रसादतः कुलचूडाम
णौच रात्रौपर्य्यटनंकुर्य्यात्स्त्रीशक्तिप्रपूजनम् ना
करोतिकथंदेवसाधकःकौलिकोभवेत् तदुक्तंकालि
कापुराणे छागंतुवामतोदद्यात्महिषंविनिवेशनः द
क्षिणेवामतोदद्यात् अग्रतोदेहशोणितम् नाभेरक्ता
द्रुधिरंपृष्ठभागस्यवापिये स्वगात्ररुधिरंदद्यात्नकदा
चित्साधकः नोष्ठस्यचिबुकस्यापिनेत्रियाणांतथैव
च कंठाधोनाभितश्चोर्ध्वंहस्तद्वागस्यप्रयत्नतः पार्श्वा
योश्चापिरुधिरंशुर्णोविनिवेदयेत् नचरोगादिका
दंगान्यदद्यातात्तुभैरव सौवर्णेराजतेपात्रेकांस्या
धारेचमानवः निधायदेवैदद्यात्तनतदुक्तंमंत्रश्चैवकम्
यद्यद्रुधिरंसंजातंमांसंरक्तमपियानतः तिलमुद्गप्र
माणंवादेवैदद्यात्तुभक्तितः षण्मासाभ्यंतरेभक्तः
काममिष्टमवाप्नुयात् कुमारीकत्यैऽपि नराश्चगा
स्तथामेषामहिषाःशशकास्तथा पतंगाश्चैवरक्तानि
देयानिपरमेश्वरि मुण्डमालायांच ईषदुक्तंकृतेनाक्त

निशायां दिवसेऽपि वा बलिं दद्याद्विशेषेण कृष्णपक्षे शुभे
दिने छागे दत्ते भवेद्वाग्मी मत्स्ये दत्ते कविर्ध्रुवम् महिषे
धनवृद्धिः स्यान्मृगे भोगफलं लभेत् पक्षे दत्ते समृद्धिः स्या
द्गोधिकायां महाफलम् नरे दत्ते समृद्धिः स्यादिष्टसिद्धि
रनुत्तमा ललाटहस्तहृदयशिरोभ्रूमध्यदेशतः स्वदेह
रुधिरं दत्ते हृद्देहरवापरः वाणालबलिदानेन महासि
द्धिः प्रजायते इष्टद्रक्तमिति मत्स्यमांसविशेषेण तस्य
करणं स्थलिखितवचनात् नरबलिस्तु न विप्रेण वि-
धेयः तदुक्तं यामले राजा नरबलिं दद्यान्नामात्योऽपि पर
मेश्वरि तत्रापि न तु विप्रेण ततो वक्ष्यमाणमन्त्रेण देवी
स्तुत्वा प्रदक्षिणत्रयं विधायाष्टप्रणामं कुर्य्यात् तदुक्तं
कालीतन्त्रे ततो वै शिरसा पुष्पं दत्वाष्टांगप्रणामं च अथ
प्रदक्षिणं यथा प्रसार्य दक्षिणं हस्तं स्वयं नम्रशिराः पु
नः दक्षिणं दर्शयन् मां स्वमनसापि च दक्षिणः त्रिधा चवे
ष्टयेत्सम्यक् कालिकायाः प्रदक्षिणम् सर्वान्कामान
वाप्नोति पश्चान्मोक्षमवाप्नुयात् अष्टांगप्रणामो यथा
दोर्भ्यां पद्भ्यां च पाणिभ्यां उरसा शिरसा दृशा मनसा वच
सा चेति प्रणामोऽष्टांग ईरितः अपाको प्रणामः यथा बा
हुभ्यां च सजानुभ्यां शिरसा वचसा धिया पंचांगकः प्र
णामः स्यादुपितः परिकीर्तितः ततः सामयिकैः सह पा

श्या नादिकं कुर्य्यात् यथा वक्राकारेण पंक्त्याकारेण वाभि-
२ न्नासने नायकैः सह शक्तिश्च गुरुमारभ्य क्रमेण पद्मास
४२ नेनोपविश्य सामयिको ललाटे चन्दनाक्षतं दत्वा शिव
शक्तिभ्यः पुष्पं दद्यात् ततो यदि गुरुस्तिष्ठति तत्रादौ
गन्धचन्दनपुष्पादिना तं प्रपूज्य तत्पात्रं तस्मै दत्वा प्र
णमेत् गुरोरभावे तत्पात्रं जले क्षिपेत् ततः पात्रं शुद्धिस
हितं शक्त्यै दत्वा सामयिकेभ्योऽपि ज्येष्ठानुक्रमेण वीर
पात्रात् परामृतं शुद्धिसहितं दद्यात् ततः सामयिकोऽ
पि भक्त्या हस्ताभ्यां गृहीत्वा मूलमन्त्रं तदुपर्य्युष्ट्या जप्त्वा
पूर्ववत् श्रीआनन्दभैरवानन्दभैरव्यौ सन्तर्प्य गुरुं देवतां
च तर्पयेत् ततस्तच्छुद्धिं कुर्य्यात् ततश्चक्रनायकैः
सह पात्रवन्दनं चरेत् श्रीमद्भैरवशाम्भवरसविलसद्देहा
मृतास्वादितं देवाद्यैः सुरयोगिनीजनगणैः सिद्धैः
समाराधितम् आनन्दार्णवकं महात्मकमिदं ध्यात्वा त्रि
खण्डामृतं वन्दे श्रीप्रथमं करोतु जगतां पात्रं विशुद्धिप्र
दम् इत्यभिवन्द्य वामहस्तेन पात्रमुत्तोल्य सव्येन कृत्वा
गुह्यामिति गुरुशक्तिसाधकानां गृह्णीयात् तेवज्रुपस
रति वृषः ततो मूलाधारात् कुण्डलिनीमिष्टदेवतास्वरू
पां विभाव्य गुरुपादुकां स्मृत्वा शिवोऽहमिति विचिन्त्य स
हस्ताभ्यां पात्रं गृहीत्वा मूलमन्त्रमुच्चार्य कुण्डलिनीमु

त्रिदेवतांतर्पयेत् ततऊर्ध्वमुद्रयाकारपञ्चमं कृत्वामंत्र।
ततस्मैरक्तरूपंदेवीकलाचिन्मयीपश्चात्पात्रवरंपरा
मृतयुतंदीपैर्युतंकज्जलैः पुष्पादिभिरभिमंत्रितंचनि
रितंसम्मोहकंचामृतंयेसंचिंत्यपिबंतियांतिखेलते
भुक्तिंचमुक्तिंपराम् तदंतरेच सिन्दूरतिलकंभाले
पाणौचमदिरासमम् कृत्वापरगुरुंध्यायेत्तथादेवींच
चिन्मयीम् इति ततःपात्रमाधारोपरिसंस्थाप्यपूर्ववं
त्पात्रंगृहीत्वापात्रवन्दनंकुर्यात् हैमंमीनरसावहंद।
यितयादत्तंचपेयादिभिः किंचिद्विवलरक्तपंकजदृशा
तस्यैसमावेदितम् वामस्थाङ्गविशुद्धिशुद्धिकरणंपाणौ
विधायात्मके वन्देपात्रमहंद्वितीयमधुनानन्दैकसं।
वर्द्धनम् इत्यादिनाद्वितीयेनक्रमेणपरामृतंगृहीत्वा
पात्रवन्दनंयथा सर्वाम्नायकलाकलापकलितंकौ।
तूहलयौवनंचन्द्रोपेन्द्रमहेन्द्रशम्भुवरुणब्रह्मादिभिः
सेवितम् ध्यातंदेवगणैःपरंमुनिगणैर्मोक्षार्थिभिःस
र्वदावन्देपात्रमहंतृतीयमधुनास्मात्मावबोधप्रदं
इतितृतीयपात्रं मध्यंमीनरसावहंहरिहरब्रह्मादिभिः
पूजितंमुद्रामैथुनधर्मकर्मनिरतंदाराम्लतिकाश्रयं
आचार्याष्टककसिन्धुभैरवकलामांसेनसंशोधितंपा
पांसंचमकारतत्त्वसहितंपात्रंचतुर्थंनमः इतिचतुर्थपा

त्रम् आधारं भुजगाधिराजवलयं पात्रं महीमण्डलम्
मद्यं सप्तसमुद्रवारि पिशितं चाष्टौ च दिग्दंतिनः सोऽहं
भैरवमर्च्चयम्प्रतिदिनं तारागणैरक्षितैरादिमप्रमुखैः
स्तारसुरगणैः राजाकरैः किंकरैः इति पंचमपात्रम् त
तो यावन्नचलते दृष्टिर्यावन्नचलते मनः तावत्पानं प्रकु
र्वीत पशुपानमतः परम् अथान्यप्रमाणं यथा तदुक्तं
रुद्रयामले साधकेभ्यश्च शाक्तेभ्यो दद्यान्निर्म्माल्यचन्द
नम् सामयिकः समं कुर्य्यात् देविपानादिभक्षणम् अ
न्यत्रापि निवसेच्चक्ररूपेण पद्माकारेण वा यथा शक्ति
युक्तो वसेद्धापि युग्मयुग्मविधानतः शिवशक्तिधिया।
सर्व्वं चक्रमध्ये समर्च्चयेत् तंत्रांतरे च ततः पुष्पं समादा
य गुरोः पात्रे निवेदयेत् गुरवे च निवेद्याथ भूमेः दत्वा स्वयं
हरेत् भावत्रयमणेच साक्षाद्यदि गुरुर्न स्यात्तदा तोये
विसर्जयेत् अत्र पात्रपरिमाणं यथा तदुक्तं कुलसारे
नयनाग्निबाणसंख्याकैर्षस्तु परमेश्वरि हेतुपात्रं प्रकर्त्त
व्यमित्युक्तं कुलशासने इत्थमायिकपात्रेण न कर्तव्यं हि
साधकैः कंपैर्लौकिकमित्यर्थः तदुक्तं कुलोड्डीशे गु
जाद्वादशमासः स्यात् द्वेष्टौ कर्षमुच्यते अथोत्तरतंत्रे
अत्रतां पुरतो लब्धा गृह्णामीति स्वयं वदेत् जपेत्सम्पत्तुः
तातो गुरुणा वा कुलीनकैः गृह्णीयाच्च स्वयं सिद्धो वद्धपा।

ग्रासनःसुधीः कुलार्णवेच एकासननिविष्टायेसंज्ञी
ताश्चैकभाजने एकपात्रेपिवेद्द्रव्यंतेयांतिनरकाधमे
एकपात्रइतिसर्वैर्मिलित्वा एकपात्रेणपिवेन्नतुवारं
वारंद्रव्यपानेभिन्नभिन्नपात्रंकुर्य्यात् अनुष्ठानापत्तेः
नकुर्य्यात्पात्रशंकरमितिवचनविरोधात् तल्लिखिष्या
सः सांप्रदायविरोधाच्च विनामद्येनयापूजाविनामांसे
नतर्पणम् विनाशक्त्याचयस्नानेनतत्सर्वंनिष्फलंभवेत्
स्वशक्तिंवीरशक्तिंवादीक्षितांगुरुसंनिधौ पाययित्वा।
पिवेद्द्रव्यमितिशास्त्रस्यनिर्णयः नपद्मांचषेशेमात्रं
नविन्दुपातयेद्यः नैकहस्तेनदातव्यंनमुद्रावर्जिते
पुनः नाक्षिपेदेकहस्तेननपिवेदेकपाणिना अन्योन्यव
न्दनंकृत्वापिवेत्तदमृतंपुनः सव्येनोद्धृत्यपात्रंतुसुरां
कृत्वापसव्यतः विनासंगेनयोगेननकुर्य्याद्द्रव्यसंगतिं
साधारंनोद्धरेत्पात्रंआधारेचविनिक्षिपेत् पात्रंनचाल
येत्स्थानात्नकुर्य्यात्पात्रशंकरम् सशब्दंनपिवेद्द्रव्यंन
चैवतंनपूरयेत् नस्थूलेनैवसूक्ष्मंचपात्रंकुर्य्यान्मनोर
मम् उच्छिष्टंनस्पृशेच्चकेकुलद्रव्याणिदापयेत् निष्ठी
वनमधोवायुचक्रमध्येविवर्जयेत् चक्रमध्येघटेभग्ने
पात्रेवपतितेभुवि दीपनाशेचशांत्यर्थंश्रीचक्रंकारये
त्सुधीः स्वपात्रस्थितहेतुंचनत्यजेद्देवायच दत्तेवसिद्धि

पूजा हानिःस्यात्क्रुद्धाभवतियोगिनी परीहारंसंप्रवक्षामि
र णुंवरभाषणम् उदासीनंभयंक्रोधंचक्रमध्येविवर्ज
४४ येत् नामोमंताड्येत्पात्रेनपात्रमानयेदधः गुरुशक्ति
44 सुतानांचगुरुज्येष्ठकनिष्ठयोः उच्छिष्टंभक्षयेत्त्वीणां।
नान्योनोच्छिष्टमर्पयेत् चक्रमध्येचनियमंनास्याः।
पतनंभवेत् कनिष्ठानांस्वशिष्याणांदद्याद्धोच्छिष्टमेव
हि दद्यात्त्वेहेनयोः मेध्यःसभवेत्पापदायदम् अन्यत्रापि
शाक्तोच्छिष्टंपिबेद्द्रव्यं वीरोच्छिष्टंचचर्व्वणम् पीत्वापी।
त्वापुनःपीत्वापुनःपततिभूतले उत्थायचपुनःपीत्वा
पुनर्जन्मनविद्यते ततःशान्तिस्तोत्रंपठेत् तदुक्तंडामरे
पीत्वापेयंजनैःसार्द्धंशांतिस्तोत्रंततःपठेत् नश्यंतुप्रेत
कूष्माण्डाः नश्यंतुदूषकानराः साधकानांशिवाःसंतु
आम्नायपरिपालिनाम् जयंतिमातरःसर्व्वाःजयंति
योगिनीगणाः जयंतिसिद्धडाकिन्योजयंतिगुरुपङ्क्तयः
जयंतिसाधकाःसर्व्वेविशुद्धाःकौलिकाश्चये समयाचा
रसंपन्नाजयंतिपूजकानराः नन्दंतिचाणिमासिद्धान
न्दंतिकुलपालकाः इन्द्राद्यादेवताःसंतुतृप्यंतुवास्तु
देवताः चन्द्रसूर्यादयोदेवास्तृप्यंतुममभक्तितः नक्ष
त्राणिग्रहायोगाःकरणाराशयश्चये सर्व्वेतेसुखिनोयां
तिसर्प्पानश्यंतुपक्षिणः पशवस्तुरगाश्चैवपर्व्वताकन्द

राकृताः ऋषयोब्राह्मणाः सर्वेशान्तिंकुर्वन्तुसर्वदा श्व
भामेविदिताः संतुमित्रात्तिष्ठंतुपूजकाः येयेपापा
पिपः स्वभूषणारताः स्वनिन्दकाः पूजनेदेवाचारविमन
नष्टरुद्ध्याभ्रष्टाश्चयेसाधकाः दृष्ट्वाचक्रमध्येवमन्दा
रुद्ध्यायेकौलिकादूषकास्तेतेयांतुविनाशमत्रसम
येश्रीभैरवस्याज्ञया येदुष्टाः साधकानांसदेवाम्ना
यदूषिकाः डाकिनीनांसुविंयांतुतस्मास्तत्रिशितेस्व
ताः पशवोनाशमायांतुममनिन्दाकराश्चये दुष्टाः
साधकानांचतेनश्यंतुशिवाज्ञया ततोयथाविधिना
शिवशक्तिसमायोगंकृत्वादेवीपादेषात्मानंसमर्प्य
श्रीपात्रमुत्तोल्यदेव्याउपरित्रियाभ्रामयित्वामूलमुच्च
रन्श्रीदक्षिणकालिकेपराऽमृतंबार्ह्येस्वाहा इमंश्चैद
त्वातदुपरिपुनः संस्थाप्यसहारमुद्रयादेवीस्वहृदिस
मानीयश्रीदक्षिणकालिकेपूजितासितमस्वेतिवि
सर्ज्ज्येपश्चात्सामाण्डलिकांकृत्वानिर्माल्येननिर्माल्य
वासिन्यैनमः इतिमण्डलेत्रिः संपूजयेत् ततःकुमारी
कल्पे देवताग्रेतुसंभागेदेवताप्रीणनंभवेत् संभोगंतु
परंकृत्वादेवीहृदिसमानयेत् कृतकर्माभवेन्मंत्रीनात्र
कार्य्याविचारणा अथात्मसमर्पणमंत्रोयथा इतः पूर्व
प्राणबुद्धिदेहधर्माधिकारतोजाग्रतस्वप्नसुषुप्त्यवस्था

श्या स्वकायेनमनसावाचाकर्म्मणाहस्ताभ्यांपद्भ्यामुदरेण
२ शिश्ना यत्स्मृतंयदुक्तंयत्कृतंतत्सर्वंब्रह्मार्पणंभवतु
४५ स्वाहा मांमदीयंचसकलंश्रीदक्षिणकालिकाचरण

45

समर्पणमस्तुॐतत्सत् अथकालींतत्रैव विसृज्यपा
रयामह्यासन्निधापनमुद्रया उद्वास्यहृदयेदेवींतन्म
योभवतिध्रुवम् पुरश्चरणकालेऽपिपूजाचैवप्रकी
र्त्तिता भैरवंतत्रेऽपि स्वहृदयेचवहिर्देवींसमर्प्यविधि
वत्ततः निर्म्माल्यवेश्वचोदेशानेवैद्यमर्पयेत्ततः ततःश्री
पात्रामृतंस्वपात्रेकृत्वासव्योकृत्यभूमौपात्रंमुद्रीकृत्यतदु
परिपुष्पंनिक्षिप्यपात्रप्रक्षालनंकृत्वागोपयेत् तदुक्तं
तंत्रांतरे अर्घ्यादिवन्दनमाचर्य्यअर्घ्यामृतंपिवेत्ततः
मुद्रीकृत्वास्वयंपात्रंतत्रपुष्पंविनिक्षिपेत् प्रक्षाल्यगोपये
त्पात्रंतत्त्वचिंतापरोवुधः ततस्तदमृतस्त्रियभूमौमाया
वीजंविलिख्यैकनिष्ठांगुलिनानिलकंकुर्य्यात्तेनच यं
यंस्पृशतिपादेनयंयंपश्यतिचक्षुषा सएववशतांया
तियदिशक्रसमोभवेत् ततोयंत्रलेपंमूर्द्ध्निकृत्वानैवेद्यं
सर्व्वदेवायसायकायचदत्वाशेषंस्वीकृत्यसोऽहमितिभा
वयेत् वामतोविलवाचारपरायणोनिःशंकोयथासु
खंविहरेत् तदुक्तंकुलचूडामणौ ब्रह्मरन्ध्रेगुमस्थाने
यंत्रलेपंतुधारयेत् नाशिकेभ्योनपशुभ्योनमूर्खेभ्यो

नवाद्विजे कुलीनायचदातव्यंअथवाजलमध्यतः ततः
साहमितिध्यात्वावैस्नवाचारतत्परः हरिनाम्नाजातः
भावेभावाखिलविचेष्टितः चौरवद्विचरेदेकःसदास
गविवर्ज्जितः यामलेऽपि नैवेद्यंत्रिपुरादेव्यावांछंति
विबुधाःसदा तस्मादेवंसरप्रष्टब्राह्मणोवैस्नवेऽपिच
महेशुकायसूर्य्यायगणेशाययमायच वह्नयेवरु
णायापिवायवेधनदायच ईशानायमहेशानिसाध
कायप्रदापयेत् अथत्रिपुरापदमुपलक्षणमिति
अथदेवीविसर्ज्जनानंतरंपानादिकंकुर्य्यात् तदुक्तं
कुलार्णवे दिव्यंदेव्यग्रतःपानंवीरमेकांतवासिनं
असत्रापि पानंतत्त्रिविधंप्रोक्तंदिव्यवीरपशुक्रमैः
दिव्यंदेव्यग्रतोध्यायेद्धीरंवीरासनस्थितम् तृतीयंतु
पशोःपानंपापकृल्लोकमोहकृत् उदयाकरपदस्या
असंस्कृतेवृथापानंसंस्कृतेभैरवःस्वयम् चक्रस्या
विधौप्रोक्तंसर्व्वसिद्धिकरंशुभम् असंस्कृतंपशोर्ही
नंकलदोद्वेगकारकम् संस्कृतंसिद्धिजनकंप्राय
श्चित्तादिदूषणम् मंत्राणांस्फुरणंतेनमहापातक
नाशनम् आयुःश्रीकांतिसौभाग्यप्रदानंसंस्कृतपानतः
नैष्टैश्वर्य्यविवरान्वपतनंविधिवर्ज्जनात् इतिश्रीश्यामा
रहस्येसपर्य्यापर्य्यायस्तृतीयःपरिच्छेदः ३ । अथ

श्या स्तुतिः यामले कर्पूरं मध्यमान्त्यस्वरपररहितं सेन्दुवा
२ माक्षियुक्तं बीजं ते मातरेतत्त्रिपुरहरवधू त्रिःकृतं ये ज
४९ पंति तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसंत्येव वाचः
46 स्वच्छंदं ध्वांतधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ।
ईशानं सेन्दु वामश्रवणपरिगतं बीजमन्यन्महेशि द्वं
द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् जि
त्वा वाचामधीशं धनदमपि चिरं मोहयन्नंबुजाक्षीवृ
न्दं चन्द्रार्द्धचूडे प्रभवति स महाघोरबालावतंसे २ ई
शो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तं बी
जं ते द्वन्द्वमन्यद्विगलितचिकुरे कालिके ये जपंति
द्वेषारं घ्नंति ते च त्रिभुवनमपि ते वश्यभावं नयंति सृ
क्का द्वन्द्वास्रधाराप्रकटितवदने दक्षिणे कालिकेति
३ ऊर्द्धं वामे कृपाणं करकमलतले छिन्नमुण्डं तथा
धः सव्ये चाभीर्वरं च त्रिजगदघहरे दक्षिणे कालिके
च जप्त्वैतन्नामवर्णं तव मनुविभवं भावयंत्येतदन्वते
षामष्टौ करस्थाः प्रकटितवदने सिद्धयस्त्र्यंबकस्य ४
वर्गाद्यं वह्नियुक्तं विधुरतिकलितं तत्त्रयं कूर्चयुग्मं
लज्जायुग्मं च पश्चात्स्मितमुखि तदधष्ठद्वयं योजयित्वा
मातर्ये वै जपंति स्मरहरमहिले भावयंतः स्वरूपं ते ल
क्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवंति ५

प्रमेकं वा त्र्यं वा द्वयमपि च परं वीजमसमं तव गुर्णं त्वन्ना
म्नायो जपति वा सकलमपि सदा भावयंतो जपंति ते
षां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुविंवे वा
ग्देवी छिन्नमुण्डस्रगतिशयलसत्कंठिपीनस्तनाढे ५
गतामृतानां वाहुप्रकरकृतकांचीपरिलसन्नितंबां दि
ग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् श्मशानस्थे त
ल्पे शवहृदि महाकालसुरतप्रसक्तां त्वां ध्यायन्
जननि जडचेता अपि कविः ७ शिवाभिर्घोराभिः
शवनिवहमुण्डास्थिनिकरैः परं संकीर्णायां प्रकटि
तचितायां हरवधूम् प्रविष्टां संतुष्टामुपरिसुरते
नातियुवतीं सदा त्वां ध्यायंति क्वचिदपि न तेषां परि
भवः ८ वदामस्ते किं वा जननि वयमुच्चैर्जडधियो
न धाता नापीशो हरिरपि न ते वेत्ति परमम् तथापि
त्वद्भक्तिर्मुखरयति चास्माकमपि ते तदेतत्क्षंतव्यं न
खलु पशुरोषः समुचितः ९ समंतादापीनस्तन
जघनधृग्यौवनवती रतासक्तो नक्तं यदि जपति भ
क्तस्तव मनुम् विवासास्त्वां ध्यायन्गलितचिकुरस्त
स्य वशगाः समस्ताः सिद्धौघाः भुवि चिरतरं जीवति
कविः १० समाः स्वस्थीभूतां जपति विपरीतां यदि स
दा विचिंत्य त्वां ध्यायन्नतिशयमहाकालसुरताम्

एण तदातस्यक्षोणीतलविहरमाणस्यविदुषः करांभो
२ जावश्याः स्मरहरवधूमहासिद्धिनिवहाः ११ प्रसूते
४७ संसारंजननिजगतींपालयतिचसमस्तंक्षित्यादिप्र
लयसमयेसंहरतिच अतस्त्वंधातापित्रिभुवनपतिः
श्रीपतिरपिमहेशोऽपिप्रायः सकलमपिकिंस्तौमि
भवतीम् १२ अनेकेसेवंतेभवदधिकगीर्वाणनिव
हान्विमूढास्तेमातःकिमपिनहिजानंतिपरमम्
समाराध्यामाद्यांहरिहरविरिंच्यादिविबुधैःप्रपन्न
ऽस्मिस्वैरंरतिरसमहानन्दनिरताम् १३ धरित्रीकी
लालंशुचिरपिसमीरोऽपिगगनंत्वमेकाकल्याणी
गिरिशरमणीकालिसकलम् स्तुतिःकातेमातस्त
वकरुणयामामगतिकंप्रसन्नात्वंभूयाःभवमनुना
भूयान्ममजनुः १४ श्मशानस्थःसुस्थोगलितचि
कुरोदिक्पटधरःसहस्रंत्वर्काणांनिजगलितवीर्ये
णकुसुमम् जपंस्तत्प्रत्येकंमनुमपितवध्याननिर
तोमहाकालिस्वैरंसभवतिधरित्रीपरिवृढः १५ गृ
हेसंमार्जन्यापरिगलितवीजंहिकुसुमंसमध्याह्ने
निसंविरचयतिचितायांकुजदिने समुच्चार्यप्रेम्णा
मनुमपिसकृत्कालिसततंगजारूढोयातिक्षिति
परिवृढःसत्कविवरः १६ सुपुष्पैराकीर्णंकुसुमध

त्रुघो मन्दिरमहोपुरो ध्यायन्ध्यायन् यदि जपति मान
स्तवमनुम् सगन्धर्वश्रेणीपतिरिव कवित्वामृतन
दीनदीनः पर्य्यन्ते परमपदलीनः प्रभवति १७ त्रिपं
चारे पीठे शवशिवहृदि स्मेरवदनां महाकालेनोच्चै
र्मदनरसलावण्यनिरताम् समासक्तो नक्तं स्वयम
पि रतानन्दनिरतो नरो यो ध्यायेत्त्वां भवजननि सस्या
त्स्मरहरः १८ सलोमास्थि स्वैरं पललमपि मार्जारम
पितं परं चोष्ट्रं मेषं नरमहिषयोश्छागमपि वा बलिं
ते पूजायामपि विरलवक्रे वितरतां मतां सिद्धिः स
र्वा प्रतिपदमपूर्वा प्रभवति १९ वशी मंत्रं लक्षं प्रज
पति हविष्याशनरतो दिवा मातर्युष्मच्चरणयुग
लध्याननिरतः परं नक्तं नग्नो निधुवनविनोदेन व
मंत्रं जपेल्लक्षं स स्यात्स्मरहरसमानः क्षितितले २०
इदं स्तोत्रं मातस्तवमनुसमुद्धारणजनुः स्वरूपाख्यं
पादांबुजयुगलपूजाविधियुतम् निशार्द्धे वा पूजा
समयमथवा यस्तु पठति प्रलापस्तस्यापि प्रसरति
कवित्वामृतरसः २१ कुरंगाक्षीवृन्दं तमनुसरति प्र
मतरलवशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः
रिपुः कारागारं कलयति च तं केलिकलया चिरंजीव
न्मुक्तः प्रभवति स भक्तः। प्रतिजनुः २२ इति श्रीमहा।

श्या कालविरचितं सहस्रनामस्तोत्रं संपूर्णम् ॥
२ अथोत्तरतन्त्रे कवचं लिख्यते कैलासशिखरारूढं भै
४८ रवं चन्द्रशेखरम् वक्षःस्थले समासीना भैरवी परिपृ
48 च्छति श्रीभैरव्युवाच देवेश परमेशान लोकानुग्र
हकारक कवचं सूचितं पूर्वं किमर्थं न प्रकाशितम्
यदि मे महती प्रीतिस्तवास्ति कुलभैरव कवचं का
लिकादेव्याः कथयस्वानुकम्पया श्रीभैरव उवाच
अप्रकाश्यमिदं देवि नरलोके विशेषतः लक्षवारं
वारितासि स्त्रीस्वभावाद्धि पृच्छसि श्रीदेव्युवाच से
वकाः सन्ति नाथ कुलधर्मपरायणाः यतस्तस्मात्कृ
जीवास्माशावाधिरवितापरि तेषां प्रयोगसिद्ध्यर्थं
स्वरक्षार्थं विशेषतः पृच्छामि वद भो देव कथयस्व
दयानिधे श्रीभैरव उवाच कथयामि शृणु प्राज्ञे
कालिकाकवचं परम् गोपनीयं पशोरग्रे स्वयोनिर
परे यथा सर्वविद्यामहाराज्ञी सर्वदेवनमस्कृता
कालिकाकवचस्य भैरवऋषिरुष्णिक्छन्दः अ
द्वैतरूपिणी श्रीदक्षिणकालिकादेवता ह्रीं बीजम्
हूं शक्तिः क्रीं कीलकं सर्वार्थसाधनपुरःसर मंत्रसिद्धौ
विनियोगः ॐ सहस्रारे महापद्मे कर्पूरधवलो गुरुः
वामोरुस्थिततच्छक्तिः सदा सर्वत्र रक्षतु परमेशः

गुरुः पातु परापरगुरुस्तथा परमेष्ठीगुरुः पातु दिव्य
सिद्धिश्च मानवः महादेवी सदा पातु महादेवस्तदाव
तु त्रिपुरो भैरवः पातु दिव्यरूपधरः सदा ब्रह्मानन्दः
सदा पातु पूर्णदेवः सदावतु चलचित्तः सदा पातु चे
लाचलश्च पातु माम् कुमारः क्रोधनश्चैव वरदः स्मर
दीपनः मायामायावती चैव सिद्धौघाः पातु सर्वदा वि
मलः कुशलश्चैव भीमसेनः सुधाकरः मीनो गोरक्ष
कश्चैव भोजदेवः प्रजापतिः कुलदेवो रतिदेवो विघ्ने
श्वरहुताशनः संतोषः समयानन्दः पातु मां मानवाः
सदा सर्वे ध्यानन्दनाथान्ताः अंबान्ता मातरः क्रमात्
गणनाथः सदा पातु भैरवः पातु मां सदा वटुकोवः स
दा पातु दुर्गा मां परिरक्षतु शिरसः पादपर्यन्तं पातु मा
घोरदक्षिणा तथा शिरसि मां काली हृदि शूले वरद
तु सर्वाणि विद्यादेवी सदा सर्वं रक्षतु क्रीं क्रीं क्रीं
वदने पातु हृदि हूं हूं सदावतु ह्रीं ह्रीं पातु सदाधारे
दक्षिणा कालिके हृदि क्रीं क्रीं क्रीं पातु मे पूर्वे हूं हूं द
क्षे मामवतु ह्रीं ह्रीं मां पश्चिमे पातु हूं हूं पातु सदोत्तरे
पृष्ठे पातु सदा स्वाहा मूला सर्वत्र रक्षतु षडंगे युवतीः
पातु षडंगेषु सदैव माम् मंत्रराजः सदा पातु ऊर्ध्वाधो
दिग्विदिक्स्थितः चक्रराजः स्थिताश्चापि देवताः परि

षण
र
४९

ऐं नमाम उग्रा उग्रप्रभा दीप्ता पातु पूर्वत्रिकोणके नी
लाघना बलाका च तथापरत्रिकोणके मात्रा मुद्रा मि
ता चैव तथा मध्यत्रिकोणके काली कपालिनी कु
ल्ला कुरुकुल्ला विरोधिनी बहिः षट्कोणके पांतु वि
प्रचित्ता तथा प्रिये सर्वाः श्यामाः खड्गधरा वामहस्ते
च तर्जनाः ब्राह्मी पूर्वदले पातु नारायणी तथाग्निके
माहेश्वरी दक्षदले चामुण्डा राक्षसेऽवतु कौमारी प
श्चिमे पातु वायव्ये चापराजिता वाराही चोत्तरे पातु
नारसिंही शिवेऽवतु ऐं ह्रीं असितांगः पूर्वभैरवः परि
पातु ऐं ह्रीं चण्डश्च दक्षिणे ऐं ह्रीं क्रोधो नैरृतेऽवा
तु ऐं ह्रीं उन्मत्तकस्तथा पश्चिमे ऐं ह्रीं मां कपाली वा
युकोणके ऐं ह्रीं भीषणाख्यश्च उत्तरेऽवतु भैरवः ऐं
ह्रीं संहाराख्य ऐशान्यां मातृणामंकगाः शिवाः ऐं हेतुको
बटुकः पूर्वदले पातु सदैव मां ऐं त्रिपुरान्तको बटुकः
आग्नेय्यां सर्वदावतु ऐं अग्निजिह्वबटुकोऽव्यात्तु नै
रृत्यां पश्चिमे तथा ऐं कालबटुकः पातु ऐं करालबटु
कस्तथा वायव्यां ऐं एकः पातु उत्तरे बटुकोऽवतु ऐं भी
मबटुकः पातु ऐशान्यां दिशि मां सदा ऐं ह्रीं ह्रीं हुं फट्
स्वाहान्ताश्च तः षष्टिमातरः ऊर्ध्वायो दक्षया माग्रे पृष्ठ
देशे तु पातु मां ऐं हुं सिंहव्याघ्रमुखी पूर्वे मां परिरक्षतु

ऐंक्रांक्रींसर्पसमुद्भवीअग्निकोणेसदाऽवतु ऐंमांमांम
गमेघसमुद्भवी दक्षिणेमांसदाऽवतु ऐंचौंचौंगजराजसमु
द्भवीनैरृत्येमांमांसदावतु ऐंपंमंविशालसमुद्भवीपश्चिमे।
पातुमांसदा ऐंक्लौंक्लौंक्रोष्टसमुद्भवीवायुकोणेसदाऽवतु
ऐंह्रांह्रांफट्सदीर्घसमुद्भवीनैवौत्तरमहोदधी पातुमामुत्त
रेकोणेऐंह्रींह्रींशिवकोणके रुक्षजंघतालजंघप्र।
लंबोष्ठीसदाऽवतु प्रेताःश्मशानवासिनोभीषणावि
कृताननाः पातुमांसर्वदादेव्याःसाधकाभीष्टपूरिका
रक्षोमांसर्वतोरक्षेदाग्नेय्यामग्निदेवता दक्षेयमःसदा
पातुनैरृत्यांनैरृतिस्तथामाम् वरुणोऽवतुमांपश्चात्।
वायुर्मांवायवेऽवतु ऊँकुवेरश्चोत्तरेपायात्पैशान्यांतु।
सदाशिवः ऊर्द्ध्वंब्रह्मासदापातुअधश्चानंतदेवता ए
वंदिदिक्स्थिताःपांतुवज्राद्याश्चायुधाश्चमां का।
लिकाऽवतुशिरसिहृदयेकालिकाऽवतु आधारे।
कालिकापातुपादयोःकालिकाऽवतु दिक्षुमांकालि
कापातुविदिक्षुकालिकाऽवतु ऊर्द्ध्वमेकालिकापा
तुअधश्चकालिकाऽवतु चर्मासृङ्मांसमेदोऽस्थिम
ज्जाशुक्राणिमेऽवतु इंद्रियाणिमनश्चैवदेहंसिद्धिश्चमे।
वतु आकेशात्पादपर्यन्तंकालिकामेसदाऽवतु विय
तिकालिकापातुपथिमांकालिकाऽवतु शयनेकालि

श्यो
बं
५०

50

कापातु सर्व्वकार्य्येषु कालिका पुत्रान्मे कालिका पातु
धनं मे पातु कालिका यत्र मे संशयाविष्टास्तान्नाशंपतु।
शिवा त्वया इतीदं कवचं देवि ब्रह्मलोकेऽपि दुर्लभम्
तव प्रीत्या मया ख्यातं गोपनीयं स्वयोनिवत् तव नाम्नि
स्मृते देवि सर्व्वयज्ञफलं लभेत् सर्व्वपापः क्षयं याति वा
ञ्छासर्व्वत्र सिध्यति नाम्नः शतगुणं स्तोत्रं ध्यानेतस्मा
च्छताधिकम् तस्माच्छताधिको मन्त्रः कवचं तच्छता
धिकम् शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः
संस्थाप्य वामभागे तु शक्तिं स्वामिपरायणाम् रक्तव
स्त्रपरीधानां शिवमन्त्रधरां शुभाम् या शक्तिः सा महादे
वी हररूपश्च साधकः अन्योऽन्यचिन्तनाद्देवि देवत्वमु
पजायते शक्तियुक्तो यजेद्देवीं चक्रे वामनसापि वा
भोगैश्च मधुपर्काद्यैस्ताम्बूलैश्च सुवासितैः ततस्तु क
वचं दिव्यं पठेदेकमनाः प्रिये तस्य सर्व्वार्थसिद्धिः स्यान्ना
त्र कार्य्या विचारणा इदं रहस्यं परमं परं स्वस्त्ययनं महत्
त् यः सकृत्तु पठेद्देवि श्रद्धया सुसमाहितः सर्व्वान्
लभते कामान् स्परेद्देवीपुरं व्रजेत् सकृद्यस्तु पठेद्देवि।
कवचं देवदुर्लभम् सर्व्वयज्ञफलं तस्य भवेदेव न सं
शयः संग्रामे च जयेच्छत्रून्मातङ्गानिव केशरी नास्त्रा
णि तस्य शस्त्राणि शरीरे प्रभवन्ति च तस्य व्याधिः क

दाचिद्दुःखं नास्ति कदाचन गतिस्तस्यैव सर्वत्र वाञ्छ
त्तस्यः सदा भवेत् दीर्घायुः कामभोगीशो गुरुभक्तः सा
दा भवेत् अघोरकवचमाहात्म्यं पठमानस्य नित्यशः वि
नापि नयप्रयोगेन योगीशः समतो व्रजेत् भूर्जत्वचि सा
मालिख्य चक्रं तत्र विनिर्मितम् मध्ये त्रिकोणे संलिख्य
साध्यसाधकयोर्लिपिम् उद्धरेन्मूलमंत्रं च मातृकाणे
न वेष्टयेत् लघुमिश्रेण चन्द्रेण चन्दनाभ्यां महेश्वरि प
तन्मंत्रं महेशानि सहरासहरसहउलेभम् गोरोचनाकुंकु
मास्यां तद्वाह्यकवचं लिखेत् प्राणमन्त्रेण संवेष्ट्य लाक्ष
यापरिमण्डयेत् पंचामृतैः पंचगव्यैः स्नापयित्वा शुभैः
हनि संपूज्य देवतारूपं गुटिकां सर्वकामदाम् प्राणप्र
तिष्ठामंत्रेण प्राणांस्तत्र नियोजयेत् अन्तर्योनिं ततो ध्या
त्वा तत्र संस्थापयेद्बुधः पश्चात् गुटिका देवि कंठलग्ना
खिलप्रदा शीर्षे वश्यकरी देवी नाभौ स्तंभनकारिणी
बद्धा वामभुजे देवि वैरिपक्षक्षयंकरी जठरे रोगदम
नी पुत्रदा बाहुदिसंस्थिता विद्याकरी ललाटस्था शिखा
यां तु यशःप्रदा सर्वकामप्रदा देवी सर्वरोगक्षयंकरी
दक्षिणे वाहुमूले वै यदि तिष्ठति सर्वदा तदा सर्वार्थसि
द्धिः स्यात् यद्यन्मनसि वर्तते अघोरात्मकवचस्यास्य पठना
द्धारणात् प्रिये सर्वान् कामान् अवाप्नोति तव स्नेहात् प्रकाशि

पुण
२
५१
51

नम् गुरोः पादप्रसादेन सद्विद्यां यदि लभ्यते तथैव क।
वचं देवि नाजप्त्वा गुरुपादुकाम् न फलं नाशमाप्नोति प
रे नरकमाप्नुयात् समं समं समं पुनः समं समं समं समं पुनः पुनः
न शक्नोमि प्रभावं तत्कवचस्यास्य वर्णितम् यस्मै कस्मै
न दातव्यं कवचं च सुदुर्लभम् न देयं परशिष्येभ्यः कृप।
णेभ्यः सुरेश्वरि शिष्याय भक्तियुक्ताय सेवकाय तथै
व च गुरुभक्तिविहीनाय परदाररताय च निन्दकाय कु
लीनाय दाम्भिकाय च सुन्दरि यो ददाति निषिद्धेभ्यः क।
वचं मन्त्रवोत्तमम् तस्य नश्यन्ति देवेशि आयुः कीर्त्ति
यशः श्रियः नहिं सन्ति सदा देवि योगिनी मातृमण्डला
त् परे नरकमाप्नोति जन्मकोटिशतानि च देयं शिष्याय
शान्ताय गुरुभक्तिपराय च सर्वलक्षणयुक्ताय तन्त्रमन्त्र
युताय च इत्युत्तरतन्त्रे कालीप्रस्तावे कालीभैरवसंवादे
श्रीमद्दक्षिणकालिकाकवचं सम्पूर्णम् शुभम् ॥
विरूपाक्ष उवाच नमामि गुरुमन्तोऽयं मन्त्रशक्तिसमवि
भम् प्रसन्नं ज्ञानमज्ञाने देते बुद्धिप्रकाशकम् गजेन्द्र
वदनं नौमि सर्वविघ्नविदारकम् पाशाङ्कुशवराभीतिल
सद्भुजचतुष्टयम् भैरवः सर्वदा पातु अष्टधिर्मे शिरसोप
रि भैरवस्त्वन्दः सदा पातु नष्टश्च विजयात्मकम् गुणत्र।
यमयी शक्तिः परशक्तिस्त्वरीडिता ब्रह्मस्वरूपिणी पातु

दयेमम कालिका बीजस्वरूपिणी पातु क्रीं कारी शक्ति
रूपिणी हूं शक्तिः सर्वदा पातु सर्वरक्षास्वरूपिणी महा
कालः सदा पातु महाभीमपराक्रमः दक्षातु मम कामा
न् सर्वसिद्धीश्वरो यतः आदिलृ वर्णपर्य्यन्ताः हृदये म
म मातृकाः पञ्चाते उ आदिं चान्तास्वरं रक्षन्तु वाऊष्ठगमके
नभमध्यगता वर्णमादिक्षान्तास्तथैव च सबिन्दवः स।
दा पान्तु जन्तुःयोरु भयो मम भूतप्रेतपिशाचाद्या विघ्न
देहात्तथात्मनः पृथग्भावाः सम मध्यास्वर्णा रक्षन्तु
मां सदा समस्तरोमकूपेषु मर्म्मस्थानेषु सन्धिषु नाडी
यातु विकारेषु रक्षन्तु मम मातृकाः शक्तिरा यथा रूपा।
या मां पातु परमेश्वरी स्ववर्णः सर्वदा पातु सर्वदेवमयः
स्वयम् फणागता वनिः पातु समुद्रः पातु मां सदा रत्न
द्वीपः सदा पातु रक्षन्तु कल्पपादपाः श्मशानपीठकः
पातु पातु मां मानवेदिका सदाशिवमहाप्रेतशवो मां।
परिरक्षतु द्वारदेशे द्वारपाला योगिमः पातु मां सदा
सिद्धयोऽष्टौ सदा पान्तु पृथ्व्यादिवसुदिग्गताः कालीक
पालिनी कुल्ला कुरुकुल्ला तथैव च विरोधिनी विप्रचि
त्ता नमामि सर्वसिद्धये एतास्तु वशायोगिमो वह्निः षट्
कोणके स्थिताः रक्षन्तु मां सदा देव्यो मातरो भक्तवत्स·
लाः उग्रामुग्रप्रभां दीप्तां नमाम्यात्मविभूतये सर्वसि।

पुरा ह्रिंप्रथर्च्चन्तपात्तमांपुत्रवत्सदा नीलांद्यनांवलाकां
२ वशरणमामिसमुत्सुकः सर्व्वविघ्नान्तसमात्साध्यरक्षत
५२ कलुषार्णवात् मात्रासुद्धामितानांचनमामिचरणांबु
52 जम् देवीप्रमसखीनांचशरणंयामिसिद्धये पत्ताःपव
द्मेकोणपकैकावरदासदा नत्रिंनीवामहस्तेनवे।
द्दक्षिणपाणिना मुण्डमालाधराःशीर्षेनीलांजनचये
पमाः शत्रुभ्यःसिद्धिदाश्चण्डाःपान्तुमांकालिकाप्रियाः
वहिःपद्मदलांतेतुब्रह्माण्याद्यष्टशक्तयः रक्षंतुमेप्रय
त्नेनसर्व्वसिद्धिंदयान्विताम् ब्रह्माणीपातुमांपूर्व्वस।
द्यौःशिववरप्रदाः वैष्णोनारायणीपातुसर्व्वकामार्थ।
सिद्धिदा माहेश्वरीदक्षिणेपातुसर्व्वमंगलकारिणी चा
मुण्डानैर्ऋत्येपातुसर्व्वशत्रुप्रमर्द्दिनी कौमारीपश्चिमे
पातुशक्तिहस्ताविमर्द्दिनी अपराजिताचवायव्यांपा
तुमांजयदाशुभा उत्तरेपातुवाराहीवरदाघोररूपिणी
नारसिंहीसदापातुपेशानांभयनाशिनी पताल्लपर
विद्यायाःशक्तयस्त्वष्टदेवताः ब्रह्मविष्णुशिवादीनांते
जोभिन्नकलेवरा सूर्य्येन्दुवह्निपीठन्तुवेन्दवेपरमेश्व
री नमामिदक्षिणामूर्त्तिंकालिकांपरभैरवीम् भिन्ना
ञ्जनचयप्रख्यांप्रवीनशावसंस्थिताम् गलच्छोणितधा
राभिःस्मेराननसरोरुहाम् पीनोन्नतकुचद्वन्द्वपीन

वद्नोनिंतविनीम् दक्षिणमुक्तकेशानी दिगंबरवि-
नोदिनीम् महाकालसमाविष्टांस्मशानस्योपरिस्थितां
सवेसान्नस्मितामोदमोदिनीमद्विह्वलां घोरकस्म
त्वेसान्नादिनेत्रलीभिर्विराजिताम् शवहृदयकृतोनं।
मांसिन्दूरतिलकोज्वलाम् पंचाशन्मूर्तिघटितमालां
शोणितलोहिताम् नानामणिविशोभाङ्गांनानालंका
रशोभिताम् शवास्थिकृतकेयूरशंखकंकणमंडि।
नाम् शववक्त्रःशवमांसकृतग्रासांसाट्टहासांमुहुर्मुहुः
खङ्गमुण्डधरांवामसव्ये:भयवरप्रदाम् दन्तुरांचमहा
रौद्रींचण्डनादातिभीषणाम् शिवाभिर्घोररावाभिर्वे
ष्टितांभयनाशिनीम् माभैर्माभैःस्वभक्तेषुजल्पन्तीं।
घोरनिस्वने रूपंकिमिच्छथब्रूथददामीतिप्रभाषिणीं
त्वंगतिःशरणंदेवित्वंमातापरमेश्वरि पाहिमांकरुण
मांत्रेनमस्तेपरमेश्वरीम् नमस्तेकालिकेदेवीनमस्ते
भक्तवत्सले: मूर्खत्वंहरमेदेविप्रतिभाप्रतिदायिके
गद्यपद्यमयींवाणींतर्कव्याकरणादिकीम् अनधीत
गतांविद्यांदेहिदक्षिणकालिके जयंदेहिसभामध्ये।
धनंदेहिधनागमे देहिमेचिरजीवित्वंकालिकेरक्षद
क्षिणे राज्यंदेहियशोदेहिपुत्रान्दारान्धनंतथा देहान्ते
देहिमेमुक्तिंजगन्मातर्नमोऽस्तुते मंगलामेरवीदुर्गा

पु.का. कालिकात्रिदशेश्वरी उमाहैमवतीकन्याकल्याणीभैर
२ वेश्वरी कालीब्राह्मीचमाहेशीकौमारीमधुसूदनी
५३ वाराहीवारुणीचण्डात्वंजगत्स्मनयोमुदा उग्रतारेतिता
53 रेतिशिवेसैकजटेतिच लोकोमरेतिवालेतिगीयते
कृतिभिःसदा यथाकालीतथातारातथाछिन्नाचकु
ल्लुका एकमूर्तिश्चतुर्भिश्चदेवित्वंकालिकापरा एक
स्थितिविधादेविकोटिधानन्तरूपिणी अंगांगकैर्नाम
भेदैःकालिकेतिप्रगीयते शंभुःपंचमुखैर्नैवगुणा
न्वक्तुंक्षमोनते चापल्यंतत्कृतंसर्वंक्षमस्वशुभदाभव
प्राणान्नक्षयशोरक्षपुत्रदारधनंतथा सर्वकालेसर्व
देशेपाहिदक्षिणकालिके यःसंपूज्यपठेत्स्तोत्रंदिवा
वासन्ध्ययोस्तथा अवाप्यमहतीप्रज्ञांसर्वकामांस्त
तोलभेत् यद्यत्प्रार्थयतेचित्तेतत्तदाप्नोतिकाकथा
सर्वंलक्ष्मीर्विसेदेहेमुक्तिःकरगतापुनः इतिश्रीरुद्रया
मलेउत्तरतंत्रेदक्षिणकालिकाकवचंसमाप्तम् ॥
अथस्तोत्रम् महाकालभैरवउवाच स्तवराजंश्रृण्व
रामसर्वकालमनोहरम् यस्यस्मरणमात्रेणकालि
कासंप्रसीदति यद्गुह्यंसर्वदेवानांभृगुवंशसमुद्भव
गोपनीयंप्रयत्नेनपठनीयंपरात्परम् कालीस्तोत्रम
सम्प्रथःकस्मैचिन्नप्रकाशितम् कथ्यतेत्वदनुरोधेन

सर्वपापप्रणाशनम् शृणु राम शृणु राम शृणु राम स
दैवरि गोपनीयं गोपनीयं गोपनीयं न संशयः गण
णेशस्तु ऋकेशेन त्रः शक्तिसङ्गतः रक्तचन्दनसिं
दूरैस्तथा पंचोपचारकैः मत्स्यमांससुराद्यैश्च तांबू
लैश्च विशेषतः पूजयित्वा महाकालीं महाकालर
तोत्तराम् तीर्थपानं विधायादौ तांबूलं भक्षयेत्ततः
भगलिंगामृतं मध्ये निवेदयेत्तु साधकः जपित्वा च
महामंत्रं कालीरूपं मनोहरम् मनसा चिंतयेत्कालीं
पठेत्स्तोत्रं तु साधकः रक्षोयक्षपिशाचेभ्यो निस्तर
णाकरं परम् प्रसन्ना कालिका तस्य पुत्रत्वेनानुकंप
ते दक्षिणकालिके मातर्मुण्डमालाविभूषिते भक्त
त्राणाय प्रचिंतेयम जाड्यं विनाशय ज्वलच्चितानिभा
घोरेश्वपरिवारसमन्विते त्वमहंभोजमापन्नरक्तमां
पुत्रवत्सदा महामेघच्छविमासेमेक्तकेशि चतुर्भुजे
पाणिस्मककविताचैवमंदेहिमरेश्वरि वामोर्द्धे च।
महावज्रविधारयसिप्रांकरि अधोलसच्छिन्नमुण्ड
ममविघ्नविनाशाय अभयं दक्षिणे चोर्ध्वे तथाधःपाणि
ना वर कंठसंसक्तमुण्डालि महाकालि नमोऽस्तु ते
सततं त्वत्स्वरूपं ये स्मरंति साधकोत्तमाः तेषां समस्त
शास्त्रेषु गतिरव्याहता सदा चिन्तयामि च तत्त्वामरत्न

एणा मांसर्वतःसदा दिगंबरीकरालास्यांघोरदंष्ट्राभयानक
२ काम् कर्णमूलेशवयुग्मांस्थूलतुंगपयोधराम् महा
५४ रौद्रीमहाघोरांस्मशानालयवासिनीम् शवपाणिम
54 मूहैम्सकृतकांचीहसन्मुखीम् ओष्ठप्रान्तगलद्रक्तधा
राविस्फुरिताननाम् मुण्डालीसस्रवद्रक्तैःसंबोगवा
रुचर्चिताम् शिवाभिर्घोररावाभिश्चतुर्दिक्षुसमन्विता
म् पूजाकालेयदेध्यस्तुसद्भावपुलकोद्भवः सभवेत्का
लिकापुत्रइतिख्यातिमुपागतः रजस्वलाभगंपश्यन्न
स्नाकालीमहामनुम् स्तवेनानेनसंस्तुत्यसाधकः किं
नसाधयेत् अष्टोत्तरशतंजप्त्वायोनिमांमंत्रवित्
संगास्यपठनात्सर्वविदोस्यरोभवेत् मातेवदक्षिणा
तस्यसर्वत्रहितकारिणी तस्यदेहेसदाकालीवसेद्वा
त्रसंशयः पूजाजपविहीनायश्रीगुरोर्निन्दकायच
धर्मार्गस्यचरुद्रायगुरुभक्तायसर्वदा एतवस्त
प्रयत्नेनस्तवमेनंनदर्शयेत् प्रमादाद्दर्शनाद्धापितस्य
सिद्धिर्भवेन्नहि इतिश्रीकालिकापरमरहस्येकाली
हृदयेमहाकालभैरवपरशुरामसंवादेश्रीदक्षिण
कालिकास्तवःसमाप्तः ॥
तंत्रान्तरोक्तकवचम् श्रीभैरवउवाच कालिकाया
महाविद्याकथिताभुवि दुर्लभा तथापिहृदयेशल्य

मस्ति देवि कृपां कुरु कवचं तु महादेवि कथयस्वा
नुकंपया यदि नो कथ्यते मातर्विमुञ्चामि तदा तनुम
श्रीदेव्युवाच शंकापि जायते वत्स तव स्नेहात्प्रकाश
यते न वक्तव्यं न द्रष्टव्यमतिगुह्यतरं महत् कालि
का जगतां माता शोकदुःखविनाशिनी विशेषतः
कलियुगे महापातकहारिणी काली मे पुरतः पातु
पृष्ठतश्च कपालिनी कुल्ला मे दक्षिणे पातु कुरुकुल्ला
तथोत्तरे विरोधिनी शिरः पातु विप्रचिता च चक्षुषि
उग्रा मे नासिकां पातु कर्णौ चोग्रप्रभा तथा वदने
पातु मे दीप्ता नीला च चिबुकं तथा घना ग्रीवां सदा
पातु बलाका बाहुयुग्मकं मात्रा पातु करद्वन्द्वं वा
क्षो मुद्रा सदावतु मिता पातु स्तनद्वन्द्वं योनिमण्ड
लदेवताः ब्राह्मी मे जठरं पातु नाभिं नारायणी तथा
ऊरू माहेश्वरी पातु चामुण्डा पातु लिंगकम् कौमा
री च कटीं पातु जंघायुग्मं तथैव च अपराजिता च।
पादौ मे वाराही पातु चांगुलीः सन्धिस्थानं नारसिं
ही पत्रस्था देवताः वतु रहितं च यत्स्थानं वर्जितं
कवचेन तु तत्सर्वं रक्ष मे देवि कालिके घोरदक्षिणे
ऊर्द्धमधस्तथा दिक्षु पातु देवी स्वयं वपुः हिंसेभ्यः स
र्वदा पातु साधकं च जलाधिकात् दक्षिणकालिका

श्या देवीमापकंमेसदावत इदंकवचमज्ञात्वायोभजेद्
र दक्षिणाम् नपूजाफलमाप्नोतिविघ्नस्तस्यपदेपदे
५५ कवचेनावृतोनित्यंयत्रयत्रैवगच्छति तत्रतत्राभयं
55 तस्यनत्तोभविद्यतेक्वचित् इतिश्रीदक्षिणकालि
काकवचंसमाप्तम् ॥ अथसहस्रनामस्तोत्रम्
श्रीशिवउवाच कथितोऽयंमहामंत्रःसर्वमंत्रोत्तमो
त्तमः यामासाद्यमयाप्राप्तमैश्वर्यपदमुत्तमम् सं
युक्तःपरयाभक्त्यायथोक्तविधिनाभवान् कुरुतां
सर्वंनदेव्यास्त्रैलोक्यविजिगीषया श्रीरामउवाच
प्रसन्नोयदिमेदेवपरमेशपुरातन रहस्यंपरयादे
व्याःकृपयाकथयप्रभो विनार्च्चनंविनाहोमंविना
न्यासंविनाबलिम् विनागन्धंविनापुष्पंविनानित्यो
दितांक्रियाम् प्राणायामंविनाध्यानंविनाभूतवि
शोधनम् विनादानंविनाजापंयेनकालीप्रसीदति
श्रीशिवउवाच पृष्टंत्वयोत्तमंप्राज्ञभृगुवंशसमुद्भ
व भक्तानामपिभक्तोऽसित्वमेवंसाधयिष्यसि देवीं
दानवकोटिघ्नीलीलयारुधिरप्रियाम् सदास्तोत्रप्रि
यामुग्रांकामकौतुकलालसाम् सर्वदानन्दहृदया
मासवोत्सवमानसाम् माध्वीकमत्स्यमांसानुरागि
णींवैष्णवींपराम् श्मशानवासिनींप्रेतगणनृसम

हेत्सवाम् योगप्रभावंयोगेशीयोगीन्द्रहृदयस्थितं
तामुग्रकालिकांरामप्रसादयितुमर्हसि तस्यास्तोत्रं
परंपुण्यंस्वयंकाल्याप्रकाशितम् तवतत्कथयिष्या
मिश्रुत्वावत्सावधारय गोपनीयंप्रयत्नेनपठनीयंप
रात्परम् यस्यैककालपठनात्सर्वेविघ्नाःसमाकुलाः
नश्यंतिदहनेदीप्तेपतंगाइवसर्वतः गद्यपद्यमयी
वाणीतस्यगंगाप्रवाहवत् तस्यदर्शनमात्रेणवादि
नोनिष्प्रभांगताः तस्यहस्तेसदैवास्तिसर्वसिद्धिर्न
संशयः राजानोऽपिवशास्तस्यभजंतेकिंपरेजनाः
निशीथेमुक्तकेशस्तुनग्नःशक्तिसमाहितः मनसा
चिन्तयेत्कालींमहाकालेनलालितां पठेत्सहस्रना
मांख्यस्तोत्रंमोहस्यसाधने प्रसन्नाकालिकातस्यपु
त्रत्वेनानुकंपते यथाब्रह्मामृतैर्ब्रह्मकुसुमैःपूजिता
परा प्रसीदतितथानेनस्तुताकालीप्रसीदति अस्य
श्रीदक्षिणकालिकासहस्रनामस्तोत्रस्य महाकालभै
रवऋषिरनुष्टुप्छन्दःश्मशानकालीदेवता धर्मार्थ
काममोक्षार्थेविनियोगः ॐश्मशानकालिकाकाली
भद्रकालीकपालिनी गुह्यकालीमहाकालीकुरुकु
ल्लाविरोधिनी कालिकाकालरात्रिश्चमहाकालनितं
बिनी कालभैरवभार्य्याचकुलवर्त्मप्रकाशिनी काम

पुण दाकामिनीकमलाकमनीयस्वरूपिणी कस्तूरीरसलि।
र मांगीकुंजरेश्वरगामिनी ककारवर्णसर्वांगीकामि
५९ नीकामसुन्दरी कामार्त्ताकामरूपाचकामधेनुःक
56 लावती कांताकामस्वरूपाचकामाख्याकुलकामिनी
कुलीनाकुलवत्यंबादुर्गादुर्गतिनाशिनी कौमारीकु
लजाकृष्णाकृष्णदेहाकृशोदरी कृशांगीकुलिशांगी
चक्रीकारीकमलाकला करालास्याकरालीचकु-
लकान्तापराजिता उग्रउग्रप्रभादीप्ताविप्रचित्तामहा
बला नीलाघनामेघनादामात्रामुद्रामितासिता ब्रा
ह्मीनारायणीभद्रासुभद्राभक्तवत्सला माहेश्वरीच
चामुण्डावाराहीनारसिंहिका वज्रांगीवज्रकंकाली
नृमुण्डस्रग्विणीशिवा मालिनीनरमुण्डालीगलद्र
क्तविभूषणा रक्तचन्दनसिक्तांगीसिन्दूरारुणमस्तका
घोररूपाघोरदंष्ट्राघोराघोरतराशुभा महादंष्ट्रामहा
मायासुदन्तीयुगदन्तुरा सुलोचनाविरूपाक्षीविशा
लाक्षीत्रिलोचना शारदेन्दुप्रसन्नास्यास्फुरत्स्मेरांबु
जेक्षणा अट्टहासाप्रफुल्लास्यास्मेरवक्त्रासुभाषिणी
प्रफुल्लपद्मवदनास्मितास्याप्रियभाषिणी कोटराक्षी
कुलश्रेष्ठामहतीबहुभाषिणी सुमतिःकुमतिश्चण्डा
चण्डमुण्डातिवेगिनी प्रचण्डाचण्डिकाचण्डीचर्चि

ताण्डवगिनी सुकेशी मुक्तकेशी च दीर्घकेशी महा
कचा प्रेतदेहकर्णपूरा प्रेतपाणिसुमेखला प्रेतासना
प्रियप्रेता प्रेतभूमिकृतालया श्मशानवासिनी पुण्या
पुण्यदा कुलपण्डिता पुण्यालया पुण्यदेहा पुण्यश्लो
का च पावनी पूता पवित्रा परमा परा पुण्यविभूषणा पु
ण्यनाम्नी भीतिहरा वरदा खड्गपाशिनी नृमुण्डहस्ता
शान्ता च छिन्नमस्ता सुनासिका दक्षिणा श्यामला श्या
मा शान्ता पीनोन्नतस्तनी दिगम्बरी घोररावा सृक्कान्त
रक्तवाहिनी घोररावा शिवा संगा निःसङ्गा मदनातुरा
मत्ता प्रमत्ता मदना सुधासिन्धुनिवासिनी अतिमत्ता म
हामत्ता सर्वाकर्षणकारिणी गीतप्रिया वाद्यरता प्रे
तनृत्यपरायणा चतुर्भुजा दशभुजा अष्टादशभुजा त
था कात्यायनी जगन्माता जगती परमेश्वरी जगद्ब
न्धुर्जगद्धात्री जगदानन्दकारिणी जगज्जीवमयी हैम
वती माया महालया नागयज्ञोपवीताङ्गी नागिनी ना
गशायिनी नागकन्या देवकन्या गान्धारी किन्नरेश्वरी
मोहरात्री महारात्री दारुणा भासुराम्बरी विद्याधरी व
सुमती यक्षिणी योगिनी जरा राक्षसी डाकिनी वेदम
यी वेदविभूषणा श्रुतिः स्मृतिर्महाविद्या गुह्यविद्या पु
रातनी चिन्ता चिन्ता स्वधा स्वाहा निद्रा तन्द्रा च पार्वती ।

श्या अपर्णा निश्चला लोला सर्वविद्या तपस्विनी गंगा काशी श
र ची सीता सती सत्यपरायणा नीतिः सुनीतिः सुरुचिस्तुष्टिः
५० पुष्टिर्धृतिः क्षमा वाणी बुद्धिर्महालक्ष्मीर्लक्ष्मीर्नीलस
57 रस्वती श्रोतस्वती श्रोतवती मातंगी विजया जया नदी
सिन्धुः सर्वमयी तारा शून्यनिवासिनी शुद्धा तरंगिनी
मेधा लाकिनी बहुरूपिणी सदानन्दमयी सत्या सर्वान
न्दस्वरूपिणी सुनन्दा नन्दिनी स्तुत्या स्तवनीया स्वभा
विनी रंकिणी टंकिनी चित्रा विचित्रा चित्ररूपिणी पद्मा
पद्मालया पद्ममुखी पद्मविभूषणा शाकिनी हाकिनी
क्षांता राकिनी रुधिरप्रिया भ्रान्तिर्भवानी रुद्राणी मृ
डानी शत्रुमर्दिनी उपेन्द्राणी महेशानी ज्योत्स्ना चेन्द्र
स्वरूपिणी सूर्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पु
मान् शक्तिः सूक्तिर्मतिमती भुक्तिर्मुक्तिः पतिव्रता
सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा सर्वज्ञा सिद्धि
दा सिद्धा भाव्या भव्या भयापहा कर्त्री हर्त्री पालयित्री श
र्वरी तामसी दया तमिस्रा यामिनीस्था वस्थिरा धीरा
तपस्विनी चार्वंगी चंचला लोलजिह्वा चारुचरित्रिणी
त्रपा त्रपावती लज्जा निर्लज्जा ह्रीं रजोवती सत्ववती ध
र्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी गरिष्ठा दुष्टसंहर्त्री विशि
ष्टा श्रेयसी घृणा भीमा भयानका भीमनादिनी भीः प्र

भावती वागीश्वरी श्रीर्धेनुनायज्ञकर्त्रीयजुःप्रिया श्र
क्तासार्थ्वनिलयारागिणीशोभनस्वरा कलकंठीक
म्बुकंठीवेणुवीणापरायणा वंशिनीवैष्णवीस्वच्छाध
त्रीत्रिजगदीश्वरी मधुमतीकुण्डलिनीऋद्धिःसिद्धिः
शुचिस्मिता रंभोर्वशीरतीरामारोहिणीरेवतीरमा शं
खिनीचक्रिणीकृष्णागदिनीपद्मिनीतथा शूलिनीप
रिघास्त्राचपाशिनीशार्ङ्गपाणिनी पिनाकधारिणी
धूम्राशरभीवनमालिनी वज्रिणीसमरप्रीतावेगि
नीरणपण्डिता जटिनीबिंबिनीनीलालावण्यांबुधिच
न्द्रिका बलिप्रियासदापूज्यापूर्णादैत्येन्द्रमाथिनी महि
षासुरसंहर्त्रीवासिनीरक्तदन्तिका रक्तपारुधिराक्ता
गीरक्तखर्परहस्तिनी रक्तप्रियामांसरुचिरासवाश
क्तमानसा गलच्छोणितमुण्डालीकंठमालाविभूषणा
शवासनाचितांतस्थामाहेशीवृषवाहिनी व्याघ्रत्वंव
राचीनचेलिनीसिंहवाहिनी वामदेवीमहादेवीगौरी
सर्वज्ञभाविनी बालिकातरुणीवृद्धावृद्धमाताजरातु
रा सुभ्रुबिलासिनीब्रह्मवादिनीब्राह्मणीमही स्वप्ना
वतीचित्रलेखालोपामुद्रासुरेश्वरी अमोघारुन्धतीती
क्ष्णाभोगवत्यनुवादिनी मन्दाकिनीमन्दहासाज्वाला
मुख्यसुरान्तका मानदामानिनीमान्यामाननीयामदोद्धता

पुण मदिरामदिरोन्मादामेध्यानन्दाप्रमादिनी सुमध्यानंत
२ गुणिनीसर्व्वलोकोत्तमोत्तमा जयदाजित्वराजैत्रीजय
५८ श्रीर्जयशालिनी सुखदाशुभदासत्यासभासंक्षोभका
58 रिणी शिवदूतीभूतिमतीविभूतिर्भीषणानना कौ
मारीकुलजाकुन्तीकुलस्त्रीकुलपालिका कीर्त्तिर्यश
स्विनीभूषाभूष्याभूतपतिप्रिया सगुणानिर्गुणाधृष्टा
निष्ठाकाष्ठाप्रतिष्ठिता धनिष्ठाधनदाधन्यावसुधासु
प्रकाशिनी उर्व्वीगुर्व्वीगुरुश्रेष्ठासगुणात्रिगुणात्मिका
महाकुलीनानिष्कामासकामाकामजीवना कामदे
वकलारामाभिरामाशिवनर्त्तकी चिन्तामणिकल्पलता
जाग्रतीदीनवत्सला कार्त्तिकीकीर्त्तिकीकृत्याअयो
ध्याविषमासमा सुमंत्रामंत्रिणीघूर्णाह्लादिनीक्ले
शनाशिनी त्रैलोक्यजननीहृष्टानिर्म्मांसामनोरूपि
णी तडागनिम्नजठराशुष्कमांसास्थिमालिनी अवंती
मथुरामायात्रैलोक्यपावनीश्वरी व्यक्ताव्यक्तानेकमू
र्त्तिःशर्व्वरीभीमनादिनी क्षेमंकरीशंकरीचसर्व्वसम्मो
हकारिणी ऊर्द्ध्वतेजस्विनीक्लिन्नामहातेजस्विनीतथा
अद्वैताभोगिनीपूज्यायुवतीसर्व्वमंगला सर्व्वप्रियंक
रीभोग्याधरणीपिशिताशना भयंकरीपापहरानिष्क
लंकावशंकरी आशातृष्णाचन्द्रकलानिद्रामावायु

गिनी सहस्रसूर्यसंकाशा चन्द्रकोटीसमप्रभा वह्निम
ण्डलसंस्था च सर्वतत्वप्रतिष्ठिता सर्वाचारवती सर्वदे
वकन्याधिदेवता दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारि
का इज्या पूज्या विभी र्भूतिः सत्कीर्त्तिर्ब्रह्मरूपिणी रंभो
रुश्चतुराकारा जयन्ती करुणा कुहूः मनस्विनी देवमा
ता यशस्या ब्रह्मचारिणी ऋद्धिदा वृद्धिदा वृद्धिः सर्वाद्या
सर्वदायिनी आधाररूपिणी ध्येया मूलाधारनिवासि
नी आज्ञा प्रज्ञा पूर्णमना श्चन्द्रमुख्यनुकूलिनी वावदू
का निम्ननाभिः सत्या सन्ध्या दृढव्रता आन्वीक्षिकी दंड
नीतिस्त्रयी त्रिदिवसुन्दरी ज्वलिनी ज्वालिनी शैलतन
या विन्ध्यवासिनी अमेया खेचरी धैर्या तुरीया विम
लातुरा प्रगल्भा वारुणी छाया शशिनी विस्फुलिंगि
नी भुक्तिः सिद्धिः सदा प्राप्तिः प्राकाम्या महिमाणिमा
इच्छा सिद्धि र्विसिद्धा च वशित्वोर्ध्वनिवासिनी लघिमा
चैव गायत्री सावित्री भुवनेश्वरी मनोहरा चिता दिव्या
देव्युदारा मनोरमा पिंगला कपिला जिह्वा रसज्ञा र
सिका रसा सुषुम्नेडा भोगवती गान्धारी नरकान्तका
पाञ्चाली रुक्मिणी राधाराध्या भीमाधिराधिका अमृ
ता तुलसी वृन्दा कैटभी कपटेश्वरी उग्रचण्डेश्वरी वीर
जननी वीरसुन्दरी उग्रतारा यशोदाख्या देवकी देवमा

श्या नित्या निरंजनाचित्रदेवीक्रोधिनीकुलदीपिका कुलवा
र गीश्वरीवाणीमातृकाद्राविणीद्रवा योगेश्वरीमहामा
५९ रीभ्रामरीविन्दुरूपिणी हृतीप्राणेश्वरीउमावकुलाचा
मरीप्रभा कुब्जिकाज्ञानिनीज्येष्ठाभूशुण्डीप्रकटातिथिः
द्रविणीगोपनीमायाकामबीजेश्वरीक्रिया शांभवीके
केकरामेनामृषलाख्यातिलोत्तमा अमेयविक्रमाक्रूरा
संपत्शालात्रिलोचना सुस्थीः अवद्राशीतिरम्भाभूस्राहि
रंगदा तपिनीतापिनीविश्वाभेमादाधारिणीधरा त्रिख
ण्डाबोधिनीवश्यासकलाशब्दरूपिणी बीजरूपामहा
मुद्रायोगिनीयोनिरूपिणी अनंगकुसुमानंगमेखला
नंगरूपिणी वज्रेश्वरीचजयिनीसर्वद्वन्द्वक्षयंकरी षडं
गयुवतीयोगयुक्ताज्वालांशुमालिनी दुराशयादुराधा
रादुर्जयादुर्गरूपिणी दुरंतादुष्कृतिहरादुर्ध्येयादुरतिक्र
मा हंसेश्वरीत्रिकोणस्थाशाकंभर्य्यनुकंपिनी त्रिको
णनिलयानित्यापरमामृतरंजिता महाविद्येश्वरीश्वे
ताभेरुण्डाकुलसुन्दरी त्वरिताभक्तिसंसक्ताभक्तव
श्यासनातनी भक्तानन्दमयीभक्तभाविकाभक्तशं
करी सर्वसौन्दर्य्यनिलयासर्वसौभाग्यशालिनी स
र्वसंभोगभवनासर्वसौख्यनिरूपिणी कुमारीपूजनर
ताकुमारीव्रतचारिणी कुमारीभक्तिसुखिनीकुमारी

रूपधारिणि कुमारीपूजकप्रीताकुमारीप्रीतिदाप्रिया
कुमारीसेवकासंगाकुमारीसेवकालया आनन्दभैर
वीबालाभैरवीवटुभैरवी श्मशानभैरवीकालभैरवी
पुरभैरवी महाभैरवपत्नीचपरमानन्दभैरवी सुधा
नन्दभैरवीचउन्मादानन्दभैरवी मुक्तानन्दभैरवीचत
थातरुणभैरवी ज्ञानानन्दभैरवीचअमृतानन्दभैर
वी महाभयंकरीतीव्रातीव्रवेगातपस्विनी त्रिपुरा
परमेशानीसुन्दरीपुरसुन्दरी त्रिपुरेशीपंचदशी
पंचमीपुरवासिनी महासप्तदशीचैवषोडशीत्रिपु
रेश्वरी महांकुशस्वरूपाचमहाचक्रेश्वरीतथा नव
चक्रेश्वरीचक्रेश्वरीत्रिपुरमालिनी राजराजेश्वरी
धीरामहात्रिपुरसुन्दरी सिन्दूरपूररुचिकाश्रीमत्रि
पुरसुन्दरी सर्वांगसुन्दरीरक्तारक्तवस्त्रोत्तरीयणी
जवाजावकसिन्दूररक्तचन्दनधारिणी यवायावक
सिन्दूररक्तचन्दनरूपधृक् चामरीवालकुटिलनि
र्मलश्यामकेशिनी वज्रमौक्तिकरत्नाढ्यकिरीटमु
कुटोज्वला रत्नकुण्डलसंसक्तस्फुरद्गण्डमनोरमा
कुंजरेश्वरकुंभोत्थमुक्ताराजितनासिका मुक्ताविद्रु
ममाणिक्यहाराढ्यस्तनमण्डला सूर्यकान्तेन्दुकान्ता
ढ्यस्पर्शाश्मकंठभूषणा बीजपूरस्फुरद्बीजदन्तपंक्ति

पण रुत्तमा कामकोदण्डकाभुग्नभ्रूकटाक्षप्रवर्षिणी
२ मातङ्गकुम्भवक्षोजा लसत्कोकनदेक्षणा मनोज्ञशष्कु
८ लीकर्णा हंसीगतिविडम्बिनी पद्मरागाङ्गदज्योतिर्दोश्च
60 तुष्कप्रकाशिनी नानामणिपरिस्फूर्जच्छुद्धकाञ्चन
कङ्कणा नागेन्द्रदन्तनिर्म्माणवलयाङ्कितपाणिनी
अङ्गुरीयकचित्राङ्गी विचित्रक्षुद्रघण्टिका पट्टाम्बरपरी
धाना कलमञ्जीरशिञ्जिनी कर्पूरागुरुकस्तूरीकुं
कुमद्रवलेपिता विचित्ररत्नपृथिवीकल्पशाखित
लस्थिता रत्नद्वीपस्फुरद्रक्तसिंहासनविलासिनी
षट्चक्रभेदनकरी परमानन्दरूपिणी सहस्रदलप
द्मान्तश्चन्द्रमण्डलवर्त्तिनी ब्रह्मरूपशिवक्रोडनाना
सुखविलासिनी हरविष्णुविरिञ्चीन्द्रग्रहनायकसे
विता शिवा शैवा च रुद्राणी तथैव शिववादिनी मा
तङ्गिनी श्रीमती चैव तथैवानन्दमेखला डाकिनी योगि
नी चैव तथोपयोगिनी मता माहेश्वरी वैष्णवी च भ्रा
मरी शिवरूपिणी अलम्बुषा वेगवती क्रोधरूपा सुमे
खला गान्धारी हस्तिजिह्वा चेडा चैव शुभङ्करी पिङ्ग
ला ब्रह्मसूत्री च सुषुम्ना चैव गन्धिनी आत्मयोनिर्ब्रह्म
योनिर्जगद्योनिरयोनिजा भगरूपा भगस्थात्री भगिनी
भगरूपिणी भगात्मिका भगाधाररूपिणी भगमालिनी

लिंगाख्यो चैव लिंगेशी त्रिपुरा भैरवी तथा लिंगगीतिः
सुगीतिश्च लिंगस्था लिंगरूपधृक् लिंगाभिधायिनी
लिंगप्रिया लिंगनिवासिनी लिंगस्था लिंगिनी लिंगरू
पिणी लिंगसुन्दरी लिंगगीतिर्महाप्रीता भगगीति
र्महाभगा लिंगनामसदानन्दा भगनामसदागतिः
भगनामसदानन्दा लिंगनामसदागतिः लिंगमाला
कंठभूषा भगमालाविभूषणा भगलिंगामृतप्रीता
.... भगलिंगामृतरूपा च भगलिंगस्व
रावरा स्वयंभूकुसुमप्रीता स्वयंभूकुसुमार्चिता स्व
यंभूकुसुमप्राणा स्वयंभूकुसुमोत्थिता स्वयंभूकुसु
मास्नाता स्वयंभूपुष्पतर्पिता स्वयंभूपुष्पघटिता स्वयं
भूपुष्पधारिणी स्वयंभूपुष्पतिलका स्वयंभूपुष्पच
र्चिता स्वयंभूपुष्पनिरता स्वयंभूकुसुमग्रहा स्वयं
भूपुष्पयज्ञांशा स्वयंभूकुसुमात्मिका स्वयंभूपुष्पनि
चिता स्वयंभूकुसुमप्रिया स्वयंभूकुसुमादानलालसो
न्मत्तमानसा स्वयंभूकुसुमानन्दलहरीस्निग्धदेहिनी
स्वयंभूकुसुमाधारा स्वयंभूकुसुमाकुला स्वयंभूपुष्प
निलया स्वयंभूपुष्पवासिनी स्वयंभूकुसुमस्निग्धा स्व
यंभूकुसुमात्मिका स्वयंभूपुष्पकारिणी स्वयंभूपुष्प·
पाणिका स्वयंभूकुसुमध्याना स्वयंभूकुसुमप्रभा स्व

पुष्प यंभूकुसुमसञ्जाता स्वयंभूपुष्पभोगिनी स्वयंभूकुसुमो
२ ल्लासा स्वयंभूपुष्पवर्षिणी स्वयंभूकुसुमोत्साहा स्व
६१ यंभूपुष्परूपिणी स्वयंभूकुसुमोन्मादा स्वयंभूपुष्प
61 सुन्दरी स्वयंभूकुसुमाराध्या स्वयंभूकुसुमोद्भवा स्व
यंभूकुसुमव्यग्रा स्वयंभूपुष्पपूर्णिता स्वयंभूपूजक
प्रज्ञा स्वयंभूहोतृमातृका स्वयंभूदातृरक्षित्री स्व
यंभूभक्ततारिका स्वयंभूपूजकग्रस्ता स्वयंभूपूजक
प्रिया स्वयंभूवन्दकाधारा स्वयंभूनिन्दकान्तका
स्वयंभूप्रदसर्वस्वा स्वयंभूप्रदपुत्रिणी स्वयंभूप्रद
सस्नेहा स्वयंभूप्रदशरीरिणी सर्वकालोद्भवप्रीता
सर्वकालोद्भवात्मिका सर्वकालोद्भवोद्भवा सर्वका
लोद्भवोद्भवा कुण्डपुष्पसदाप्रीतिर्गोलपुष्पसदार
तिः कुण्डगोलोद्भवप्राणा कुण्डगोलोद्भवात्मिका
स्वयंभु वाशिवायाज्ञीया वनालोकपावनी कीर्त्ति
र्यशस्विनी मेधाविमेधा शुक्रसुन्दरी अश्विनी कृत्ति
कापुष्पा तेजस्का चन्द्रमण्डला सूक्ष्मा सूक्ष्मावलोका
चवरदाभयनाशिनी वरदाभयदा चैव मुक्तिवश्यवि
नाशिनी कामुका कामदा कान्ता कामाख्या कुलसु
न्दरी दुःखदा सुखदा मोक्षा मोक्षदार्थप्रकाशिनी दु
ष्टादुष्टमतिश्चैव सर्वकार्यविनाशिनी शुक्राधाराशु

क्रूपाशुक्रसिन्दुनिवासिनी शुक्रालयाशुक्रभोगाशु
क्रपूजासदारतिः शुक्रपूज्याशुक्रहोमसन्तुष्टाशुक्रव
त्सला शुक्रमूर्तिःशुक्रदेहाशुक्रपूजकपुत्रिणी शुक्र
स्थाशुक्रिणीशुक्रसंस्पृहाशुक्रसुन्दरी शुक्रस्नाताशु
क्रकरीशुक्रसेव्यातिशुक्रिणी महाशुक्राशुक्रभवाशु
क्रवृष्टिविधायिनी शुक्राभिधेयाशुक्रार्हाशुक्रवन्दक
वन्दिता शुक्रानन्दकरीशुक्रसदानन्दाभिधायिका शुक्रो
त्सवासदाशुक्रपूर्णाशुक्रमनोरमा शुक्रपूजकसर्व
स्वाशुक्रनिन्दकनाशिनी शुक्रात्मिकाशुक्रसंपत्शुक्रा
कर्षणकारिणी शारदासाधकप्राणासाधकासक्त
मानसा साधकोत्तमसर्वस्वासाधकाभक्तरक्तपा
साधकानन्दसन्तोषासाधकानन्दकारिणी आत्म
विद्याब्रह्मविद्यापरंब्रह्मस्वरूपिणी त्रिकूटस्थापंच
कूटासर्वकूटशरीरिणी सर्ववर्णमयीवर्णजपमा
लाविधायिनी श्रीशिवउवाच इतिश्रीकालिका
नामसहस्रंशिवभाषितम् गुह्याद्गुह्यतरंसाक्षान्म
हापातकनाशनम् पूजाकालेनिशीथेचसन्ध्ययो
रुभयोरपि लभतेगाणपत्यंसयःपठेत्साधकोत्तमः
यःपठेत्पाठयेद्वापिशृणोतिश्रावयेदथ सर्वपापवि
निर्मुक्तःसयातिकालिकापुरम् श्रद्धयाश्रद्धयावापि

पूजा
२
६२

62

यः कश्चिन्मानवः स्मरेत् दुर्गे दुर्गशतं तीर्त्वा स याति परं
मां गतिम् वन्ध्या वा काकवन्ध्या वा मृतवत्सा च या नरा
श्रुत्वा स्तोत्रमिदं पुत्रान्लभते चिरजीविनः यं यं कामय
ते कामं पठन्स्तोत्रमनुत्तमम् देवीपादप्रसादेन तत्तन्
प्राप्नोति निश्चितम् स्वयंभूकुसुमैः शुक्रैः सुगन्धिकुसु
मान्वितैः जवायावकसिन्दूररक्तचन्दनसंयुतैः मत्स्य
मांसादिभिर्धीरो मधुभिः सास्वपायसैः भक्त्योपनीतैर्मि
त्रेण शोधितैः सह पंचमैः पंचोपचारनैवेद्यैर्बलिभि
र्बहुशोणितैः धूपदीपैर्महादेवीं पूजयित्वा मनोहर
रैः जप्त्वा महामनुं स्तोत्रं पठेद्भक्तिसमन्वितः अनन्यचे
ताः स्थिरधीर्मुक्तकेशो दिगम्बरः शवारूढश्चितास्थो
वा श्मशानालयमागतः शून्यालयगतो वापि शय्या
स्थो वा शिवात्मकः स भवेत्कालिकापुत्र इति ख्याति
मुपागतः सर्वविद्यावतां श्रेष्ठो धनेन च धनाधिपः
वायुतुल्यबलो लोके दुर्जयः शत्रुमर्दनः सर्वशाकट
ग्रणीः सर्वसिद्धिसमन्वितः मधुमत्तः स्वयं देव्या सेव्य
मानः स्मरोपमः महेश इव योगीन्द्रः सर्वसत्त्वपुरस्कृ
तः कामिनीकामरूपोऽसौ सर्वाकर्षणकारकः जल
सूर्य्येन्दुवाह्नीनां स्तंभको राजवल्लभः यशस्वी सत्कवि
र्धीमान्सन्मंत्री कोकिलस्वरः वहुपुत्री गजाश्वानामी

स्वरो धार्मिकः कृती मार्कण्डेय इवायुष्मान् जरापलित
वर्जितः नवयौवनयुक्तः स्यादपि वर्षसहस्रभाक् बहु
किं कथ्यते तस्य पठतः स्तोत्रमुत्तमम् न किंचिद्दुर्लभं
लोके यद्यन्मनसि वर्तते ब्रह्महत्या सुरापानं स्तेयं गुर्व
गनागमः सर्वमाशु भवत्येव स्तवस्यास्य प्रसादतः स्व
स्त्रलाभंगापश्यन् जप्त्वा कालीमहामनुम् स्तवेनानेन
संतुष्टः साधकः किं न साधयेत् परदाररतो वापि जं
प्त्वा मंत्रं पठन्स्तवम् कुबेर इव वित्ताढ्यो जायते साध
कोत्तमः अष्टोत्तरशतं जप्त्वा योनिं साम्भ अत्नविवित् सं
गम्य पठनादस्य सर्वविद्येश्वरो भवेत् दिगंबरो मुक्त
केशः शय्यायामेष्ठुनी नरः जप्त्वा स्तुत्वा महाकाली
विचरो जायते विरात् शुक्रोत्सारणकाले च जपपूजा
परायणः श्मशानकालिकां स्तुत्वा वाणीव सत्कविर्भ
वेत् आलोकयन्त्रिनयनां विवसनां परयोषिताम् जं
प्त्वा स्तुत्वा महाकाली सर्वपापैः प्रमुच्यते स्मरतेश्च मंत्र
जप्त्वा स्तुत्वा भगवतीं शिवाम् सर्वपापैः परिमुक्तो मा
नवः स्यान्मुक्तोपमः कुहूपूर्णेन्दुसंक्रांतिचतुर्दश्यष्ट
मीषु च नवम्यां मंगलदिने पठेत्स्तोत्रं सुसाधकः भौ
मावास्यां निशीथे च चतुष्पथगतो नरः मासभक्तबलिं
दत्वा सद्यस्य मीनशोणितम् अष्टोत्तरशतं जप्त्वा पठन्ता

श्या ममसहस्रकम् सोऽदर्शनोभवेदाशुदेवगन्धर्वसेवितः
र येनतेनप्रकारेणकालीस्तुतिपरायणः स्तंभयेदखि
६३ लान्लोकान्राजानमपिमोहयेत् आकर्षयेद्देवक
63 मांवशयेदपिकेशवम् मारयेदखिलान्दुष्टानुच्चाट
यतिशात्रवान् नरमार्जारमहिषच्छागमूषिकशो।
णितैः सास्थिमांसैःसमधुभिःसौवीरैःदुग्धपायसैः यो
निलक्षणतोयेनभगलिंगामृतेनच शुक्रैःपूजाजपा।
तेनकालीमन्त्रस्यसाधकः सहस्रनामभिर्दिव्यैःस्तौ
तिभक्तिपरायणः मातेवदक्षिणानस्यसर्वत्रहितका
रिणी परनिन्दापरद्रोहपरदम्भपरायच खलायपर।
तंत्रायभ्रष्टायासाधकायच शिवाभक्तायदुष्टायदू
षकायदुरात्मने हरिभक्तिविहीनायपरदारपरायच
पूजाजपविहीनायहीहरानिन्दकायच नस्तवंदशि
येद्देविसन्दर्शणशिवहाभवेत् कुलीनायमहोत्साय।
दुर्गाभक्तिपरायच वैष्णवायविशुद्धायभक्तियुक्ताय
मंत्रिणे अद्वैतानन्दरूपायनिवेदितरतायच दद्यात्
स्तोत्रंमहाकाल्याःसाधकायशिवाज्ञया गुरुविष्णुम
हेशानामभेदेनमहेश्वरीम् स्वमंत्रांभावयेन्मंत्रीमहे
शःस्यान्नसंशयः सशाक्तःशिवभक्तश्चसएववैष्णवो
त्तमः संपूज्यस्तौतियःकालीमद्वैतभावमावहन् देव्या

नन्दन समानन्दो देवीभक्तेन भक्तिमान् स एव धर्मो यस्या
ध्येमहेशो ब्रह्मानन्तः कामयित्वा यथाकामं स्तवमेनं
मुदीरयेत् सर्वरोगविनिर्मुक्तो जायते मदनोपमः चक्र
वा स्तवमेनं वा धारयेदंगसंगतम् विलिख्य विधिवत्सा
धुः स एव कालिकातनुः दैत्यनिवेदितं यद्यत्तत्सर्वं शोभ
नं येन्नरः दिव्यदेहधरो भूत्वा देव्याः पार्श्वचरो भवेत् नै
वेद्यनिन्दकं दृष्ट्वा नृत्यन्ति योगिनीगणाः रक्तपानोद्य
ताः सर्वे मांसास्थिचर्वणोद्यताः तस्मान्निवेदितं दैवे
दृष्ट्वा श्रुत्वा च मानवः न निन्देन्मनसा वाचा सर्वथापि प
रात्सवे: आत्मानं कालिकात्मानं भावयन् स्तौति यः शि
वाम् शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः यस्या
लये तिष्ठति स्तवमेतत्स्तोत्रं भवान्यालिखितं विधिवत्तैः
गोरोचनालक्तककुंकुमाक्तसिन्दूरकर्पूरमधुद्रवेण
न तस्य चौरस्य भयं न दस्योर्मनोरथानाशनिवह्निभीतिः
उत्पातवायोरपि नात्र शंका लक्ष्मीः स्वयं तत्र वसेद
लोला स्तोत्रं पठन्वै नन्दनं तपस्तु पकालीपदांभोज प
रो मनुष्यः वियान पूजाफलमेव सम्यक् प्राप्नोति सं
पूर्णमनोरथो सौ सम्यक्ः श्रीवरणारविन्दविमुखो
स्वर्गाग्नि नोभोगिनो ब्रह्मलोपेन्द्रपि वा त्रिकार्द्धनस्त्रवे
लोकेप्यनोलेभिरे श्रीमत्सद्गुरुभक्तिपूर्वकमहाकाली

पुण पठनात्पाठितेनापि भुक्तिर्मुक्तिः । स्वयं स्तुतिपराशक्तिः करस्था
२ यिनी इति श्रीकालिकाकुलसर्वस्वे सहस्रनामसंवादे काल
६४ कासहस्रनामस्तोत्रं समाप्तम् ॥ अथ मन्त्रसिद्ध्यर्थं
64 पुरश्चरणविधिर्लिख्यते तदुक्तं कालीतन्त्रे आदौ पुर
श्चर्यां कुर्वन् नियमेन यथाविधि लक्षमेकं जपेद्धीमा
न्हविष्याशी दिवा शुचिः रात्रौ ताम्बूलपूरास्यः शय्यायां ल
ब्धमानतः ततः सिद्धमन्त्रो मन्त्री प्रयोगार्हो न चान्यथा ।
जीवहीनो यथा देही सर्वकर्मसु न क्षमः पुरश्चरणही
नोऽपि तथा मन्त्रः प्रदायकः तस्मादादौ पुरश्चर्यां कुर्या
त्साधकसत्तमः नानाचारेन कर्त्तव्यो नोच्चारणमितस्त
तः भूतहिंसा न कर्त्तव्या पशुहिंसा विशेषतः बलिदानं वि
ना देव्या हिंसा सर्वत्र वर्जिता अस्य मन्त्रपुरस्कारं निन्दां वै
व विवर्जयेत् प्रयोगं च ततः कुर्यात्सर्वमेव तु लेभम् ।
स्वतन्त्रेऽपि दिवा लक्षं शुचिर्भूत्वा हविष्याशी जपेन्नरः
ततस्तु तद्दशांशेन होमयेद्धविषा प्रिये तीर्थतोयेन पय
सा मधुना सर्पिषा दिवा मधुना वा सितामिश्रतोयेन
परमेश्वरि देवीं चाभिषिंचेत्तोयैस्तर्पणं च दशांशतः
तद्दशांशे हविष्यान्नं भोजयेद्भक्तितः प्रिये कालीमन्त्र
विदो विद्वान्दक्षिणां गुरवे ददेत् पाशवं कथितं कर्म
शृणुष्वैवं ततः प्रिये फेत्कारिणोऽपि भक्ष्यादिनियमा

हारः सकृद्रात्रौविधीयते दिवाचैवजपंकुर्य्यान्मोरः
स्वाश्रणिकोद्विजः शाकयावकभक्ष्याशीचरुणासह
सर्पिषा दध्यामूलफलैर्व्वापिकुर्य्याद्दर्शनमन्वहम्
ब्रह्मचर्य्यंतथैवोक्तंस्नानंदिवसनन्तथा पूर्व्वाह्णेदेव
तायाश्चपूजांकृत्वाविशेषतः सर्व्वेमंत्राःप्रयोक्तव्याः
प्रायश्चप्रणवादिकाः ताराहीनंतथैव नवात्रसिद्धिमा
प्नोतिहीनेचप्रणवान्तरे ठद्वयान्तेठठयंचनमोऽन्तेव
नमोनच वाकचैवकामः शक्तिश्चप्रणवः श्रीश्चकथ्य
ते तदाद्येषुचमंत्रेषुप्रणवंनैवयोजयेत् वैष्णवेप्रण
वंदद्यात्शैवेशक्तिंनियोजयेत् शाक्तेकामंगणेशेच
रमाबीजंस्यस्मरः सूर्य्येचैवतदाम्येषांतातीयंवि
नियोजयेत् प्रणवाद्यंगृहस्थानांतच्छूमनिष्फलंभ
वेत् आद्यन्तयोर्व्वनस्थानांयतीनांमरुतामपि अत
स्यचेताश्चासीनोवाग्यतोविहिताशनः जपमन्त्रामूल
मंत्रश्चगुरुवन्दनपूर्व्वकम् ताराप्रदीपेच कूर्म्मचक्र
मंविवीक्ष्यआसनंतत्रकल्पयेत् चैनाजिनकुशोष्ट्रैव
स्त्रचित्रकंबलेषुवा आसनानिप्रकल्प्याथस्वविशेत्
साधकोनमः शरीर्व्वाकुशाद्र्भैवानचर्म्मणितथापुनः
महाशंकोपरिस्थित्वासाधयेद्धाप्रयत्नतः अमंत्रापि
देवतागुरुमंत्राणामेकांसंभावयन्धिया जपेदेकमनाः

श्रग प्रातःकालमथ्यन्हिनावधि यावत्संख्यंसमारभ्यंतत
२ कर्त्तव्यनवश्लणकम् यदिस्मनाधिकंकुर्य्याद्धनश्रष्टोम
६५ वेन्नरः स्फटिकमालायाम् प्रातःकालंसमारभ्यजपेन्म
65 ध्यन्हिनावधि प्रथमेऽह्निय्यत्संतत्संख्यंदिनेदिने
न्यूनादिकंनजप्तव्यंसमाप्तेसदाजपेत् संख्यापूर्णे
निजद्दैवेजपसंख्यांदशांशतः यथोक्तकुण्डेकुर्या
यथाविधिसमाहितः अथवाप्रसद्दन्तस्वाङ्कुर्यात्सद
शांशतः ततोहोमदशांशन्तुजलेसंपूज्यदेवताम् त
र्पणादिकंकार्य्यमित्यादि कुलसंभवेऽपि स्नातःशु
क्लांबरधरःशुचिःप्रयतमानसः दिवाचैवंप्रकर्त्तव्यंस
र्वकामार्थसिद्धये नाराप्रदीपेच विवेश्वविधिवद्दृढा
न्मण्डलस्यमनोहरम् तस्मिन्कलसमारोप्यक्वाथ्यतो
येःप्रपूरयेत् निक्षिप्यनवरत्नानितत्रगन्धाष्टकंपु
नः आवाह्यपूजयेत्तत्रदेवीमावरणैःसह कलसाग्रेज
पेन्मंत्रंसंख्यापूरणावधि ततःपूर्णेसमागत्यगुरु
र्देवोविधानतः अभिषिंचेच्छिष्यमूर्द्धिणकलसोदर
वारिभिः ततःशिष्यप्रयत्नेनयनाथेस्तोषयेद्गुरुम्
तथैवंविधिनालब्ध्वाजप्यतद्दशांशहोमंतद्दशांश
तर्पणंतद्दशांशाभिषेकम् तद्दशांशब्राह्मणभोजनं
कारयेत् तद्दशकैहोमादिसंख्याहिगुणाजपाविप्रेण

कार्य्यः क्षत्रियेण त्रिगुणो जपः वैश्येन चतुर्गुणो जपः
शूद्रेण पंचगुणो जपः कार्य्यः तड्डक्केकुलप्रकाशे य
द्यदंगं विहीयेत तत्संख्या द्विगुणं जपम् कुर्वीत विच
क्षणः पंचसंख्येयासाधकोत्तमः अन्यत्रापि होमकर्म
ण्यशक्तानां विप्राणां द्विगुणो जपः इतरेषां च वर्णानां
त्रिगुणादिः समीरितः गृहे सन्तोषयेद्देवं मंत्राः सिद्धं
तिमत्रिणः मुण्डमालायां च होमाद्यशक्तो देवेशि कु
र्य्यात् द्विगुणं जपम् यदि पूजाद्यशक्तः स्यात्तदभा
वेन सुन्दरि केवलं जपमात्रेण पुरश्चर्य्या विधीय
ते अथात्र ब्राह्मणभोजनमेव रूपमेव तड्डक्केकुलप्र
काशे एकमंगं विहीयेत मंत्रसिद्धिमवाप्नुयात् अ
न्नैश्चतुर्विधैर्द्विपदाद्यैः षड्रसैरपि संभोजितेषु
विप्रेषु सर्व्वं हि सफलं भवेत् सम्यक् सिद्धैकमंत्रस्य
पंचांगोपासनेन वा हि सर्व्वमंत्राश्च सिद्ध्यन्ति तत्प्रसादा
त् कलेश्वरि अन्यत्रापि सर्व्वदा भोजयेद्विप्रान् कृतं
सांगत्वसिद्धये विप्राराधनमात्रेण व्यंगं सांगं भवे
त्सदा तंत्रान्तरेपि कृत्वा मंत्रजपं मंत्री पुरस्कारायसं
यतः दशांशं जुहुयाद्देवो यथोक्तविधानतः य
द्वा जपचतुर्थांशं स्वाहान्तं मूलमुच्चरन् ततो होमद
शांशं तत्स्वाहान्तं तर्पयेज्जलैः तर्पणस्य दशांशेनन

प्रा मो॥ नेमूलमुच्चरन् अभिषिंचेत्सम्यक् होनंजले॥ ॐ भा
र ल्मिसुद्रया फेत्कारिणाम् स्वाहान्तेनैवमंत्रेण कुर्य्या
९९ द्धोमंबलिंतथा मंत्रान्तेनामसंयोज्यतर्पयामीतितर्प
66
णम् इतिपाशावकल्पम् अथएकवीराकल्पे वि
शेषोयथा तदुक्तंकुलचूडामणौ पुरश्चरणकाले
पिपरयोषाप्रपूज्यच दीक्षितावस्त्रभूषाद्यैर्भोजनैः
पायसंसमवैः आरंभकालेनियतंसर्वपक्वान्नभोज
नम् नानाविधंपिष्टकंचनानारससमन्वितम् दुग्धंद
धिघृतंतक्रंनवनीतंसशर्करम् उपलाखण्डचूर्णंच
नानाविधरसायनम् नारिकेलंकपित्थंचनागरंगं
सुदर्शनम् लिम्पाकंवीजपूरंचदाडिमीफलमुत्तमं
नागरंगफलंचैवनानागन्धविलेपनम् चन्दनंमृग
नाभिंचश्रीखण्डंनवपल्लवम् टंकनंलोध्रकंचैवज
लजंवनजन्तथा नानाशैलसमुद्भूतंनानालंकार
भूषितम् स्वमगेहेसमानीयश्रद्धयादंकविभूषितं
प्रमतीकरणंकृत्वाशक्तीस्वाभिमुखंवनयेत् शक्ति
र्यथा तदुक्तंतत्रैव ब्राह्मणीक्षत्रियावैश्याशूद्राच
कुलभूषणा वेश्यानापितकन्याचरजकीयोगिनी
तथा विशेषवैदग्ध्ययुताः सर्व्वाएवकुलाङ्गनाः अ
थदीक्षिताष्टशक्तीः क्रमेणसंस्थाप्यपूर्व्ववदुद्धरेद्धौ

पाद्यादिकं स्थापयित्वार्घोदकेन तामभ्युक्ष्यास्त्र।
न्मंत्रेणाधेनुमुद्रयामृतीकृत्याष्टशक्तिरूपभेदं ज्ञात्वा
आलिण्णायष्टशक्तीनां संज्ञातिनामकरणं क्रमेन।
कृत्वासनादिकं गन्धपुष्पं दद्यात् तदुक्तं तत्रैव
अष्टकन्यारूपभेदं विलोक्यामर्षचेष्टितम् आलिण्ण
यष्टशक्तीनां नामभिः कृतसंज्ञकः आसनं च ततो द
त्वा स्वागतं च पुनः पुनः अर्घ्यपाद्यं च पानीयं मधुप
र्कं जलं तथा स्नापयेद्गन्धपुष्पाद्यैः केशसंस्कारमा
चरेत् धूपयित्वा ततः केशान् कौशेयं च निवेदयेत्
ततः स्नानान्तरे पीठमासीनां पादुकाद्वयम् दत्वा
तत्र समासीनां नानालंकारभूषणैः भूषयित्वानु
लेपं च गन्धमाल्यं निवेदयेत् ततस्तां तां शक्तिं पूजा
प्रकरणोक्तक्रमेण ध्यात्वा तासां मूर्द्धिण आवाहण
दिमान्तः समावाह्य जीवन्यासादिकं गन्धपुष्पधूप
दीपान् नानाद्याञ्जनादिकं दत्वा तासां सम्यक
णीक्रमेण स्तोत्रं पठेत् तदुक्तं तत्रैव तां तां शक्तिं स
मावाह्य मूर्द्धिण तासां समानयेत् भामेमण्डपमध्ये
न्तस्वर्णपात्रे सुशोभने वर्णचोष्यं लेह्यं पेयं महाभोग
निवेदयेत् अदीतितायास्तास्तत्र ततो मायां निवेद
येत् तासां संवेष्टकर्णौ च ततस्तोत्रं समाचरेत् मान

पूपा देविनमस्तेऽस्तु बलरूपधरेऽनघे कृपया हर विघ्नं
२ मे मंत्रसिद्धिं प्रयच्छ मे महेशि वरदे देवि परमानन्दस्व
६२ रूपिणि कृपया हर विघ्नं मे मंत्रसिद्धिं प्रयच्छ मे कौ
67 मारि सर्वविघ्नेशे कुमारक्रीडने परे कृपयेत्यादि
विश्वरूपधरे देवि विनतासुतवाहिनि कृपयेत्यादि
वाराहि वरदे देवि शक्रादिसुरपूजिते कृपयेत्यादि
चामुण्डे मुण्डमालासृक्चर्चिते विघ्ननाशिनि कृप
येत्यादि महालक्ष्मि महामाये क्षोभसन्तापनाशिनि
कृपयेत्यादि मितिमातर्मये देवि मितिमातर्वहि
ष्कृते एकैव बहुविधे देवि दिव्यरूपे नमोऽस्तु ते एतत्
स्तोत्रं पठेद्यस्तु कर्मारंभेषु संयतः विद्यानामस्मा
लोकात्तस्य विघ्नो न जायते कुलीनस्य द्वारदेवाः क
थितास्तव पुत्रक दीक्षाकाले नित्यपूजासमये नाद्य
पयदि तस्य पूजाफलं वत्स नीयते यक्षराक्षसैः य
दि वीरपरमान्नभोजनेन तत्र हृष्टहृदिः स्मितं स्तोत्रं प
ठेद्यावक्षावत्तृप्तिः प्रजायते आचम्य मुखवासादि
ताम्बूलं च निवेदयेत् ततो दद्यात्सुवर्णमाल्यगव्यवर
न पक्वितम् विप्रस्य प्रदक्षिणीकृत्य सर्वं प्रणम्य स्वेच्छ
भवेत् अमावदिन गच्छन्ति निजकर्माणि ज्ञानुजा
अग्रजा मातुलानी वा माता तातस्य पत्निका वयसा

जातितो वापि हीना वा परमा कला पूज्या कुलवैरैः।
सर्वैर्निर्जाहंकारवर्जितैः सर्वाभावेप्येकतरा पूजनी
या प्रयत्नतः संस्कृतासंस्कृता वापि सपतिनिषाति
स्रया सर्वाभावे परा पूज्या मदंशा योषितो यतः एक
स्मे कुलशास्त्रज्ञः पूजार्हस्तत्र भैरव सर्वे हरादयः
पूज्याः समं ब्रह्मशिवादयः एकापि चेत् युवती तत्र पू
जिता चावलोकिता सर्वापि एव परा देव्यः पूजिताः कु
लभैरव स्यादावेतेव मध्ये चलत्तु पूर्वो विशेषतः
न पूजयति चेत् कान्तां तदा विघ्नैर्विलुप्यते पूर्वार्जि
तफलं नास्ति का कथा परजन्मनि तस्मात्सर्वप्र
यत्नेन यदीच्छेदात्मनो हितम् ममापि क्रोधसन्ता
पशमने विघ्ननाशनम् यत्नतः पूजनीयाः स्युः कु
लाकुलजनाः सदा श्रेष्ठेनेन क्रमेण लक्षजपादो म
ध्ये श्रेनेव शक्तीः पूजयेत् ततो रात्रौ प्रथमप्रहरग
ते पञ्चमेनैव देवीं सम्पूज्य रहस्यमानयाग्रं शिरसि
हृदि देवीं च ध्यात्वा शिवोऽहमिति भावयन् जपं कु।
र्यात् तृतीयप्रहरं यावत् तद्रक्तमुण्डमालायाम्
गते तु प्रथमे यामे तृतीयप्रहरावधि निशायां च प्र
जप्त्वा रात्रिशेषे जपेद्वहिः स्वतन्त्रेऽपि रात्रौ मांसासवै
देवीं पूजयित्वा विधानतः ततो नग्नां स्त्रियं नग्नो रमन्

पुण क्लेदयुतोऽपिवा जपेल्लक्षंततो देवि होमयेज्ज्वलिता
२ नले योनिकुण्डेस्थिते सर्पिर्म्मांससमत्स्ययुतंमसृणाम्
६८ दशांशंतर्पयेन्मद्यैर्म्मांसमिश्रैः सुसाधकः तर्पणस्य
68 दशांशांनभिषिच्यजगन्मयीम् दशांशंभोजयेत्
साधुसाधकंकालिकाप्रियम् मद्यंमांसंचमत्स्यंच
वैश्र्वणंचप्रदापयेत् ततस्तुतोषयेद्भक्त्या गुरुं स्वर्णा॰
पतॅत दिभिः प्रियैः कल्पद्रुमादेविमंत्रैः सिध्यतिनिश्चितम्
विनापीतान्सुरांभुक्त्वामांसांगत्वारजस्वलाम् योज
पेद्दक्षिणांदेवीतस्यदुःखंपदेपदे कालीतंत्रेऽपि त
र्पणस्यविधिंवक्ष्येयेनकार्य्याणिसाधयेत् तर्पयेद्व
पयोभिश्चरक्तैर्यथाशुतैस्तथा मज्जाभिश्चतथातद्वत्स
कीयेनकचेनच आकर्षितायाःकमायाःकुलवृक्षा
लनेनच मेषमाहिषरक्तेननररक्तेनचैवहि मूषमा
र्ज्जाररक्तेनतर्पयेत्परदेवताम् एवंतर्पणमात्रेण॰
साक्षात्सिद्धीश्वरोभवेत् कविताजायतेतस्यद्वारास
परंपरा वृहस्पतिसमोभूत्वादिविवद्धुविमोदते तत
स्यपापप्रणाशनिर्जीवन्मुक्तोभवेद्ध्रुवम् उत्तरतंत्रेऽपि
योनिरूपहरिकुंडेवैकृत्वावितस्तिमात्रतः हस्तविस्ता
रितस्तावत्कृत्वावापितथाप्ययः तत्रकार्य्यादिमंत्रे
णाग्निस्थापनिकाक्रिया महाकालायदेवायदद्याद्व

प्रथमाकृतिम् एवमाद्येनमांसेनभक्तेनहविरेणव कु
लपुष्पेणमांसेनमत्स्येनविशेषतः श्मशानादिरथ्ये
वेश्मशानेज्रकृपयात्सुधीः कुलसंभवेऽपि रात्रौनग्नो
मुक्तकेशोमैथुनेनापितत्स्वतः प्रकर्तव्यंप्रयत्नेनसर्व
कामार्थसिद्धये द्विजानांचैवसर्वेषांदिवाविधिविहि
यते शूद्राणांचतथाप्रोक्तंरात्राविष्टंमहाफलम् यद्य
त्कामयतेकामंतत्तदाप्नोतिनिश्चयः कालिकाश्रुतौ
च श्रेष्ठदेवताकालिकामन्त्रजापीयःसदा श्रद्धात्मा
ज्ञानवैराग्ययुक्तःसांभवदीक्षापरतः शाक्तेषुवादि
वाब्रह्मचारीरात्रौनग्नोमैथुनाशक्तमानसः जपपूजा
दिनियमोयोषित्सुप्रियकरःसुभगोदकेनतर्पणम्
तेनैवपूजनंसर्वदाकालीरूपमात्मानंविभावयेन्न
सर्वयोषिदाशक्तोभवति सर्वहत्यातरतेमद्यदा
नानि अथपंचमकारेणसर्वमाप्नोति विद्यापण्डयनं
यामंसर्ववंशंचकवित्वंचनान्यःपरमःपन्थाविद्यतेन
मोक्षाय ज्ञानाययन्मायतत्सर्वंभूतंभव्यंयत्किंचिद्दृ
श्यमानंस्थावरंजंगमंतत्सर्वंकालिकातन्त्रेन
तत्प्रोक्तंवेदेषुश्रुतंमन्त्रजापीसपापान्तरति सन्ध्य
गम्यागमनंतरति सभ्रूणहत्यांतरतिसर्वपापंतरति
सर्वसत्वमाप्नोतिसर्वंजानातिसर्वमासीभवति स

पृषा विविक्तोभवति सर्व्ववेदाध्यायीभवति सर्व्वज्ञापीभ
२ वति सर्व्वशास्त्रार्थवेत्ताभवति सर्व्वयज्ञाधिकारीभ
६९ वति आवयोर्मित्रभूतोभवति इत्याह भगवान् शिवः
निर्व्विकल्पेनमनसायः सर्व्वं करोति अथैवं पुरश्चारी
69 प्रयोगार्हो भवति अथातोशक्तिशुद्धिर्विलिख्यते
अथ दीक्षितांगनासंगात्रिन्दाश्रुतेः तदुक्तं भावचूडा
मणौ अदीक्षितांगनासंगात् सिद्धिहानिः प्रजायते
तत्कथाश्रवणाश्रद्धा ततस्त्यागमनेयदि सत्कुलीनः
कथं देवः पूजयेत्परमेश्वरीम् श्रीक्रमेपि संशोधन
मनाचर्य्यस्त्रीषु मत्तेषु साधकः कृतेपि सिद्धिहा
निः स्यात्क्रुद्धा भवति चण्डिका तस्मात् शक्तिः शुद्धिः
कार्य्या तदुक्तं कौलतंत्रे अभिषेकाद्भवत् शुद्धिर्म्मंत्रस्मा
स्मरणात्पुतो रतिकाले महेशानि दीक्षादानेनक
मकावनाद्वाय ततोप्यर्थादभिषेकं समाचरेत् मर
यारेतसावापि जलेनमन्त्रनाथवा संभोगेभिषेचेन्ना
रीरण्डां वामंत्रवर्जिताम् आदौ बालां मन्त्रोच्चार्य्यविपु
रायै समुच्चरेत् नमः शाकम्भरी उच्चार्य्य इमां कान्तां ततो
वदेत् पवित्रीकुरु शाकम्भरी ममशक्तिं कुरु स्वाहा वह्नि
जायां मन्त्रोच्चार्य्य शुद्धिमंत्र महेश्वरि अनेनमन्त्रनादे
वि अभिषिक्ताः स्त्रियः सदा रममाणो भवेन्नित्यं सर्व्व

सिद्धिमवाप्नुयात् इहलोके परं भोगं भुक्त्वा सिद्धिमवा-
प्नुयात् अमत्रापि आनीय कन्यकां दिव्यां चूर्णालज्जा
विवर्जिताम् स्वकान्तां परकान्तां वा दीक्षितां यौवना-
न्विताम् पूजकः पूजयेद्विद्वान्वामपार्श्वे निवेश्य च स्वीय
कल्पोक्तविधिना मामजालं प्रविम्मयेत् ततो जपेत्त्रि
यगाछन्देवीं त्रिभुवनेश्वरीम् शाक्तो विशेषो यथा कु-
मारीतंत्रे नटी कापालिनी वेश्या रजकी नापितांगना
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका मालाका-
रस्य कन्यापि नवकन्याः प्रकीर्तिताः एतास्वेकां विहानी
यतत्तस्य योनिमण्डले पूजयित्वा महादेवीं ततो मैथुन
मारभेत् यस्मा यस्मै हविर्दीयते आत्माग्नौ मनसा स्रुचा
सुषुम्नावर्त्मना नित्यमत्र हृतीर्जुहोम्यहम् स्वाहान्तो-
यं महामंत्र आरंभे परिकीर्तितः ततो जपेत्त्रिंयगाछ
न्देवीं त्रिभुवनेश्वरीम् प्रकाशाकाशहस्ताभ्यामवलंब्यो
न्मनी स्रुचा धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यह
स्वाहान्तोऽयं महामंत्रः अङ्गसङ्गे प्रकीर्तितः अथास्य प्र
योगः निशायां शक्तिं सर्वालङ्कारां स्ववामभागे समानीय ततः
स्वागात्रे स्वकल्पोक्तन्यासान् विधाय अदीक्षितां चेत्तदा
सर्वालङ्काराभिषेकमंत्रेण तीर्थादीना अभिषेकं कृत्वा तत।।
स्याः कर्णे अभेदत्र्यक्षरं मंत्रमुच्चारयेदिति शाक्तिसृष्टिः

श्या ततोमकारं पंचमेन देवीं संपूज्य मूलान्ते धर्म्माधर्म्मा
१ दिपठन् मातृपीठे पितृमुखं दत्वा जपं कुर्य्यात् ततो मू
७। लान्ते प्रकाशाकाशेत्यादि पठन् तत् समुत्सृजेत् अथवा
70 मातृपीठे पितृमुखं दत्वा जपं कुर्य्यात् सावरणां देवीं
ध्यात्वा शिवोऽहमिति भावयन् उभयोः समं मत्वा पू
र्वोक्तजपादिकं कुर्य्यादिति पर प्रकारः इति श्यामारहस्ये
पंचमपरिच्छेदः ५ अथ मंत्रभेदाः निरूप्यन्ते तदुक्तं
सिद्धेश्वरतंत्रे अथ वक्ष्यामि ते देवी कालिकां भवदुः
खहां यां ज्ञात्वा साधको भोगान् भुक्त्वा मोक्षमवाप्नुया
त् मूकोऽपि कविताभिधनेन च धनदोपमः बलेन प
वनः साक्षात् रूपेण च मनोहरः मंत्रोद्धारं शृणुष्व मंग
लातुल्यतरं प्रिये सामादिं वह्निमारूढं वामनेत्रेण संयु
तम् चन्द्रार्द्धबिन्दुनामूर्द्धिन भूषितं परमेश्वरि सान्ता
दिं वामनेत्रस्थं वह्निचन्द्रसमन्वितम् वीजरत्नमिदं प्रो-
क्तं साक्षात्कल्पद्रुमं प्रिये मादनं चन्द्रवीजं स्यात् भृगुस्वर
समन्वितम् चन्द्रार्द्धबिन्दुभूषाढ्यं संपूर्णं सिद्धिदं मंत्र
श्रेष्ठं वाशेषमाहात्म्यं वक्तुं नाहं महेश्वरि तथापि कथ्य
ते देवि संक्षेपादस्य यत्फलम् मोक्षार्थी लभते मोक्षं कै
वल्यं परमं पदम् देवीरूपं जगत्सर्वं पश्येद्द्वैतं तत्र विवर्जये
त् अथ मंत्रान्तरं तंत्रे च तदुक्तं मंत्रान्तरं प्रवक्ष्यामि शृणु

पार्वति सादरम् यस्याराधनमात्रेण सर्वसिद्धीश्वरो भ
वेत् अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित् न कुत्रा
पि समाख्यातं तव स्नेहादिहोच्यते पूर्वोक्तमंत्रराज
स्य शेषवर्णद्वयं प्रिये संहारसृष्टिमार्गेण वक्ष्यामोऽ
पि न दर्शयेत् मंत्रस्य स्मरणाद्देव सकृदप्यस्य सुन्दरि
कोटिजन्मार्जितं पापं तत्क्षणाद्देव नश्यति न कुत्रापि
समाख्यातं तव स्नेहादिहोच्यते पूर्वोक्तमंत्रराजस्य शे
षवर्णद्वयं प्रिये संहारसृष्टिमात्रेण मूकः काव्यका
रोति च तस्य दर्शनमात्रेण वादिनो मूकसंकुलाः इन्दु
भावं परित्यज्य किमन्यत्कुजल्पितैः यद्यत्प्रार्थयते
चित्ते तत्तदाप्नोति निश्चयः ऋषिः स्याद्भैरवो देवोऽनुष्टु
प्छन्दः प्रकीर्तितम् देवता कालिका प्रोक्ता वर्णवर्ग
फलप्रदा ध्यानमस्याः प्रवक्ष्यामि शृणु पार्वति सादरं
नीलेन्दीवरसन्निभां त्रिनयनामापीनतुंगस्तनीम्
भास्वन्मौलिकिरीटभोगिगगनांवीणां भुजैर्विभ्रतीम्
खड्गं शङ्खवराभयां स्मितमुखीं मोहान्धकारापहाम्
